भारतीय विद्वत् परिषत् – 2010-2021
कोराड सुब्रह्मण्यम्

# प्राणः

Breath is a process in which Oxygen (प्राणवायु) is taken and Carbon Dioxide is exhaled.
The term प्राण has got a couple of meanings --

1. प्राण **means 'life'** -- 'प्राण is gone ' - means 'dead'.(प्र + ॑अन ' प्राणने - दिवादिः =प्राणः -- प्राणिति = living etc.) --
ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थस्विर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥ मनुस्मृतिः **2-120**
**(quoted by Patanjali under** एकः पूर्वपरयोः **6-1-81) .**
प्राणs of a younger person will go up as soon as an elderly person arrives . By getting up and offering नमस्कार (i.e., I am inferior to you and you are superior to me) one can retrieve them. This is just an अर्थवाद -- not to be taken literally.
2. प्राणेश्वर **means husband** -
सन्त्यन्ये पि बृहस्पतिप्रभृतयः सम्भाविताः पञ्चषाः
तान्प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते ।
द्वावेव ग्रसते दिवाकरनिशाप्राणेश्वरौ भास्वरौ
भ्रातः ! पर्वणि पश्य राक्षसपतिः शीर्षावशेषाकृतिः ॥ नीतिशतकम् , पराक्रमपद्धतिः
3. **The** वायु **in the body is divided into five** --
हृदि प्राणो गुदे पानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशस्थः व्यानः सर्वशरीरगः ॥ अमरकोशः
प्राण **is in the heart**, अपान is in the anus, समान is in the navel , उदान is in the throat and व्यान is in the entire body .

4. प्राण **means** ब्रह्मन् ---
अत एव प्राणः ( ब्रह्मसूत्रम् **, 1-1-23**)
कतमा सा देवतेति , प्राण इति होवाच , सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति , प्राणमभ्युज्जिहते , सैषा देवता प्रस्तावमन्वायत्ता ( छान्दोग्योपनिषत् **, 1-11-4,5**)
प्राणाबन्धनं हि सोम्य मनः (छान्दो **. 6-8-2**)
प्राणस्य प्राणम् (बृहदारण्यकोपनिषत् **, 4-4-18)**
-- इति चैवमादौ ब्रह्मविषयः प्राणशब्दः दृश्यते **,**वायुविकारे तु प्रसिद्धो लोकवेदयोः । अत इह प्राणशब्देन कतरस्योपादानं युक्तमिति भवति संशयः -- शाङ्करभाष्यम् ।
यदावै पुरुषः स्वपिति प्राणं तर्हि वागप्येति , प्राणं चक्षुः , प्राणंश्रोत्रम् , प्राणां मनः , स यदा प्रबुद्ध्यते प्राणादेवाधिपुनर्जायन्ते (शतपथब्राह्मणम् **, 10-3-3-6**).
यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति , तदैनं वाक्सर्वैर्नामभिः सहाप्येति (कौषीतकिब्राह्मणम् **, 3-3**)
तस्मात् सिद्धं प्रस्तावदेवतायाः प्राणस्य ब्रह्मत्वम् ( शां भा.)
**************************************************

## म्लेच्छशब्दः ----

ते’सुराः (महाभाष्यम् **–** पस्पशाह्निकम् ) ---
1.श्रुतिः --
"ते’सुरा हे’लयो हे’लय इति कुर्वन्तः पराबभूवुः । तस्माद् ब्राह्मणेन न म्लेच्छितवै(=) नापभाषितवै, म्लेच्छो ह वा एष यदपशब्दः"
महाभाष्यम् **(**पस्पशा**)** -- म्लेच्छा मा भूम इत्यध्येयं व्याकरणम् ।
म्लेच्छ = अव्यक्ते शब्दे - भ्वादिः - म्लेच्छति ; म्लेच्छ =अव्यक्तायां वाचि - चुरादिः - म्लेच्छयति ।
म्लेच्छः -- कर्मणि घञ् --- the one who speaks unclear (language) . Generally Greeks etc are called म्लेच्छs .
It is आर्य x म्लेच्छ ( the entry ‘Aryan ‘ as a ‘Sanskrit word’ in Dictioneries is wrong ).

It is called म्लिष्ट (म्लेच्छ + क्त) if a word is pronounced unclearly –
‘क्ष्बधस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्ट-स्वरानायासभृशेषु ’ (पा 7-2-18)|’अथ म्लिष्टमविस्पष्टम्’ इत्यमरः।
’ आर्यावर्त ’ and the virtues of आर्याः are described in महाभाष्यम् (पृषोदरादीनि यथोपदिष्टम् , पा 6-3-109 ) . I gave a detailed account of the concept and refuted the so called ‘ Aryan Invasion Theory ‘ of Western Scholars ( simply meant to generate inferiority complex in the minds of Indians) in my book ‘Theories of Language : Oriental and Occidental ‘ (DK Publishers , New Delhi – also available online ‘ eGangotri ‘ ) . The AIT is buried after 150 years
According to Indian / Vedic tradition one should try to gain धर्म even thru the usage of शब्दs --
व्याकरणज्ञानपूर्वके शब्दप्रयोगे धर्मः - is the सिद्धान्त --
वार्तिकम् **(**महाभाष्यम् **-** पस्पशा **)** --
सिद्धे शब्दार्थसंबन्धे , लोकतः , लोकतः अर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः , यथा लौकिकवैदिकेषु । (लोकः = शिष्टलोकः) |
-- वाक्यत्रयम् (कैयटः**)** ।
2.पूर्वमीमांसा **(**आर्यम्लेच्छाधिकरणम् **/**पिकनेमाधिकरणम् **) ---**
जैमिनिसूत्रम् **(1-3-5-10 )** ---
चोदितं तु प्रतीयेत अविरोधात् प्रमाणेन (सिद्धान्तसूत्रम्)
There are certain शब्दs being employed by म्लेच्छs that are not used by आर्यs - should one accept those शब्दs and their meanings or they have to be analysed thru व्याकरणम् /निरुक्तम् etc?
Those शब्दs can be accepted as there is no any विरोध with बलवत्तरप्रमाणम् ।

चोदितम् = the meaning assigned by म्लेच्छs .पिक , नेम , सत , तामरस -- etc are examples .
ऋष्यार्यम्लेच्छानां समानं प्रामाण्यम् - शब्दप्रयोगे( मञ्जूषा ) ।

*******************************************************************

## अनुस्वारस्य उच्चारणम् ---

While pronouncing अनुस्वार, one should close his mouth - both the lips should touch each other. Most of the people, even in South, pronounce it with open mouth. My father used to say – 'close your mouth while pronouncing अनुस्वार' ।

Self study of संस्कृतम् is not recommended. It should be learnt from a गुरु right from pronunciation. Pronunciation has to be learnt from a गुरु through direct interaction. If one learns वेद from a गुरु, then he does not mispronounce. There is अविच्छिन्नगुरुशिष्यपरम्परा --how would one mispronounce?
लौकिकानां हि साधूनाम् अर्थं वागनुवर्तते ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥ - उत्तररामचरितम् , **1-10**
The words of ऋषिs / आचार्यs have got more meaning / applicability than that meets the eye --
Is अनुभव not a प्रमाणम् in रसास्वाद - in लोक - in jobs etc?
न धर्मजिज्ञासायमिव श्रुत्यादय एव प्रमाणम् ब्रह्मजिज्ञासायाम् ।
किन्तु श्रुत्यादयः अनुभवादयश्च यथासंभवमिह प्रमाणम् – ब्रह्मसूत्रशांकरभाष्यम् , **1-1-2**
'(तदभावात्) अणु मनः' (वैशेषिकसूत्रम् , **7-1-23**) - is applicable in all शास्त्रs .

अर्थैकत्वादेकं वाक्यम् ... (जैमिनेः वाक्यलक्षणम्) - is applicable everywhere - in लोक / वेद ।कारकसिद्धान्त of पाणिनि is universal although he meant it for दैवी वाक् / संस्कृतम् ।
तत्तु समन्वयात् (बादरायणसूत्रम् 1-1-4) - is applicable in every event (management etc.) .

Sometimes logic would answer the question -- शास्त्रम् does not say everything so clearly. Just check with these सूत्रs --

मो’नुस्वारः ,नश्चापदान्तस्य झलि (पा 8-3-23 , 8-3-24) --- ’ उपूपध्मानीयानाम् ओष्ठौ ’ -- for मकार , ओष्ठौ are the place of articulation. For नकार also अनुस्वार, as per the second सूत्रम् above.

म्लेच्छनम् - the influence of other languages, like English, and absence of वेदाध्ययनम् for a long period are causing such problems. One should study both वेद and शास्त्र - as much as possible .If one wants good / perfect उच्चारणा, the only way is to approach a गुरु ।

उच्चारणा, नाट्यम्, सङ्गीतम्, योग etc have to be learnt thru physical interaction only. If one can do नाट्यम् thru the study of नाट्यशास्त्रम् and perform सङ्गीतम् thru the study of गान्धर्ववेद then why to go to a गुरु ?
शिक्षा gives different things-
आत्मा बुद्ध्या समेत्यार्थान् ...
अष्टौ स्थानानि वर्णानाम् ...
व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न तु पीडयेत् ... -- पाणिनीयशिक्षा
उच्चारणा is not physically exhibited by शिक्षा ।

A गुरु who learnt स्थान, प्रयत्न, स्वर etc from his गुरु and also has studied the शास्त्रs would train his शिष्यs properly . If the latter commits some mistakes what anybody can do?

श्रुति (वेदः) - is to be learnt thru श्रवणम् from a गुरु - not thru reading and this applies to वेदाङ्गs as well. In general, this language has to be learnt thru physical interaction .

शब्दः नित्यः (व्याकरणम् / पूर्वमीमांसा ) -- पाणिनि is शब्दानां स्मर्ता न तु स्रष्टा ( a registrar but not creator) -- in certain instances he heard मकार whereas in other instances he also heard अनुस्वार -- he recorded / registered both . In fact, they are two different things - मकार and अनुस्वार । He made a सूत्रम् to analyse language लघुना उपायेन ।तत्र केवलं बुद्धिविपरिणामः - मकारबुद्धौ प्रसक्तायाम् अनुस्वारबुद्धिः कर्तव्या (see - स्थानिवदादेशोऽनल्विधौ - **1-1-55** महाभाष्यम्)।

Jaimini explains Panini (शब्दनित्यताधिकरणम्) -- वर्णान्तरम् अविकारः (1-1-6-16 सिद्धान्तसूत्रम्) - it is a different वर्ण not change of वर्ण । कुमारिल also explains (श्लोकवार्तिकम्-शब्दनित्यताधिकरणम्) - - पाणिनि heard both -- दधि अत्र and दध्य् अत्र । अनुस्वार replaces मकार, which has got ओष्ठौ as the place of articulation - so the lips should touch - again it is coming through अविच्छिन्नगुरुशिष्यपरम्परा (uninterrupted chain of गुरु and शिष्य ) ।
उच्चारणा should be learnt through physical training only, otherwise there would certainly be a chance of दुरुच्चारणा, as it is rampant now.
It was there earlier also (5th Century AD?) --

दैवी वाग् व्यवकीर्णेयम् अशक्तैः अभिधातृभिः । **155 ,** ब्रह्मकाण्डः **,** वाक्यपदीयम्
अनादिमव्यवच्छिन्नां श्रुतिमाहुरकर्तृकाम् ।
शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते स्मृतिः ॥ **145 , ibid**
प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः।
कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता ? **484 ,**वाक्यकाण्डः **,** वाक्यपदीयम्
एकं शास्त्रमधीयानः न विद्यात् शास्त्रनिश्चयम् -- सुश्रुतसंहिता **-1**
*************************************************

## अन्धविश्वासः --

In Andhra (60 years ago) people used to discourage reading गरुडपुराणम्, except during the twelve days that follow the death of a person, as it is inauspicious (and someone may die as a result).
Such अन्धविश्वास reminds me what बाणभट्ट said about अनुमरणम् **(**सती**) in** महाश्वेतावृत्तान्त**,** कादम्बरी **--**
यदेतदनुमरणं नाम तदतिनिष्फलम्। अविद्वज्जनाचरित एष मार्गः । मोहविलसितमेतत् । अज्ञानपद्धतिरियम् । रभसाचरितमिदम् । क्षुद्रदृष्टिरेषा ।अतिप्रमादो’यम् । मौर्ख्यस्खलितमिदम् । ......
(मोहः=विवेकशून्यता ;विलसितम्=चेष्टितम्)
Those, who want to criticize our सनातनधर्म, take such customs, which are neither prescribed in anyधर्मशास्त्रम् nor practiced as शिष्टाचार, as examples.
There is व्याकरणम् also in गरुडपुराणम् -- the example 'तवल्कारः’ under इको यणचि **is from the same text--**
शीतार्तश्च तवल्कारः **-(** गरुडपुराण्म् **,** अध्या **204** श्लो **3 ) |**

It is our responsibility to wake up common people against meaningless customs inherited due to lack of knowledge of original texts and their usefulness .Inclusive are customs such as - not  making payment  on a Friday , not looking at cat after waking up etc.
*****************************************************

**गुरुः – शिष्यः ---**

Unless and until a शिष्य attains considerable knowledge and experience it is not possible for him to testhis गुरु ।While I did not come across any verse/ quotation to the effect, the following may be useful in the overall discussion regarding गुरु-शिष्य --
वेदमनूच्याचार्यो’न्तेवासिनमनुशास्ति - सत्यं वद , धर्मं चर ...
(तैत्तिरीयोप. शीक्षावल्ली)
The one who follows what he preaches is an आचार्य ।
नैवं विदुषाचार्यान्तेवासिनौ । अन्योन्यस्मै द्रुह्याताम् । यो द्रुह्यति । भ्रश्यते स्वर्गाल्लोकात् ।**(तैत्तिरीयारण्यकम्, अरुणम् ,19)**
Both the गुरु and शिष्य should not be hostile to each other....
But Patanjali tells us that there were (are?) some गुरुs who were difficult to be served --
स एष मनुष्यः प्रेक्षापूर्वकारी भवति , स पश्यति - दुःखमध्ययनं  दुर्धरं च ,  गुरवश्च दुरुपचाराइति । स बुद्ध्या संप्राप्य निवर्तते।
**(महाभाष्यम् ,पराजेरसोढः , पा 1-4-26 )**
Here the student , before hand , decides to return as it is difficult to serve the teacher(as one of the reasons).
Elsewhere , Patanjali says that a गुरु has to be shielded by his छात्र - should conceal his mistakes --

उत्तरपदलोपो’त्र द्रष्टव्यः -- छत्रमिव च्छत्रम् । गुरुश्छत्रम् ।गुरुणा शिष्यः छत्रवत् छाद्यः । शिष्येण गुरुश्छत्रमिव परिपाल्यः।(महाभाष्यम्, छत्रादिभ्यो णः , पा **4-4-62**)
गुरोः दोषाणामावरणं छत्रम् --न्यासकारः , दीक्षितश्च **(**कौमुदी**)** ।
गुरवो बहवस्सन्ति शिष्यवित्तापहारिणः।
दुर्लभो’यं गुरुर्देवि ! शिष्यचित्तापहारकः ॥कुलार्णवे , प्रबोधचन्द्रोदये , परशुरामकल्पसूत्रे **(**व्या**)**

Today we come across many faculty members/ Professors who collect a portion of monthly Fellowship of Research scholars on a regular basis .

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथं प्रतिपन्नस्य परित्यागो विधीयते ॥महाभारतम् , शान्ति. , **5-77)**

So the शिष्य should desert such a गुरु - the one who is full of ego , does not consider do's and don'ts and goes beyond his limits .

गुरुः **–** आचार्यः **--** उपाध्यायः **----**

गुरुः –

गुशब्दस्त्वन्धकारस्स्यात् रुशब्दस्तन्निवारकः ।

अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते ॥ निरुक्तपरिभाषा

गुरुरुपायः – शिवसूत्रम् , **2-6**

गृणाति उपदिशति तात्त्विकमर्थम् इति गुरुः । शिवसूत्रविमर्शिनी

निषेकादीनि कर्माणि यः करोति यथाविधि ।

संभावयति चान्नेन स विप्रो गुरुरुच्यते ॥ मनुस्मृतिः , **2-142** (निषेकः = गर्भाधानम् ) ।

अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः ।

तमपीह गुरुं विद्याश्रुतोपक्रियया तया ॥ मनुस्मृतिः **, 2-149**

गृणाति धर्मादि । गिरत्यज्ञानं वा । गॄ शब्दे (क्र्यादिः) गॄ निगरणे (तुदादिः) वा । कृग्रोश्च ( उणादिः 1-24) इति उः । अमरः

गुरू गीष्पतिपित्राद्यौ – अमरः **, नानार्थवर्गः , 163**

उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः ।

मातुलः श्वशुरस्त्राता मातामहपितामहौ ॥

वर्णज्येष्ठः पितृव्यश्च पुमांसो गुरवः स्मृताः ।

माता मातामही गुर्वी पितुर्मातुश्च सोदराः ॥

श्वश्रूः पितामही ज्येष्ठा भगिनी गुरवः स्त्रियः। कूर्मपुराणम् **( quoted in Gurubalaprabodhika – the Telugu commentary of Amarakosa under the above ) .**

शुश्रूषस्व गुरून् – अभिज्ञानशाकुन्तलम् **- 4**

आचार्यः ---

’कोशवान् आचार्यः ’ – the one who has got a कोश (अमरः / विश्वः / मेदिनी etc) on the tip of the tongue is called आचार्य ।

मन्त्रव्याख्याकृदाचार्यः – अमरः **, 2-ब्रह्मवर्गः – 7**

In the beginning it is the parents who test the आचार्य rather than the शिष्य --

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।
साङ्गं सरहस्यं च तमाचार्यं प्रचक्षते ॥ मनुस्मृतिः **, 2-140 , similar - शङ्खस्मृतिः , 3-1,2**
आचिनोति च शास्त्रार्थम् आचारे स्थापयत्यपि ।

स्वयमाचरते यस्मात् आचार्यस्तेन चोच्यते ॥ वायुपुराणम् **, 59-30 , also** निरुक्तम्
आचार्यः कस्मात् ? आचार्य आचारं ग्राहयति , आचिनोति अर्थान् , आचिनोति बुद्धिमिति वा --निरुक्तम् **, 1-2-4**

उपाध्यायः **( who teaches by taking money for livelihood )** –

एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः ।

यो'ध्यापयति वृत्त्यर्थम् उपाध्यायः स उच्यते ॥ मनुस्मृतिः **, 2-141**

उपाध्यायान् दशाचार्यः आचार्याणां शतं पिता ।

सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते ॥ मनुस्मृतिः **, 2-145**

**Therefore** मातापितरौ **,** पार्वतीपरमेश्वरौ **,** सीतारामौ **- '** अभ्यर्हितं च **'** वार्तिकम् **,** पा सू अल्पाच्तरम् **2-2-34 (not** रामसीते **etc) .**

गर्भधारणपोषाभ्यां पितुर्माता गरीयसी **–** स्मृतिः ।

In श्लोकवार्तिकम् ,कुमारिल questions --
How can an अल्पज्ञ **certify that someone (**बुद्ध**) as** सर्वज्ञ **?**
So is it possible for a student (feedback on teachers by students in some Indian Universities) to assess a teacher at a satisfactory level - that too beyond राग and द्वेष ?
समाप्तविद्येन मया महर्षिः विज्ञापितो'भूत् गुरुदक्षिणायै ।
स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत् पुरस्तात् ॥
निर्बन्धसञ्जातरुषार्थकार्श्यम् अचिन्तयित्वा गुरुणाहमुक्तः।
वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति ॥ रघुवंशः **, स 5**
वेदव्यास was shouting with raised hands but no one cares - अर्थ and काम are from धर्म and why you people ignore such a धर्म ?
---
ऊर्ध्वबाहुर्विरौम्येष न हि कश्चिच्छृणोति मे ।

धर्मादर्थश्च कामश्च स  किमर्थं  न सेव्यते ?   62 , स्वर्गारोहणपर्व ,महाभारतम्
वेदव्यास **is quoted by** भर्त्रुहरि **(** ब्रह्मकाण्डः**,** वाक्यपदीयम् **) and** कुमारिल **(**श्लोकवार्तिकम्**,** beginning) --
इदं पुण्यमिदं पापम् इत्येतस्मिन् पदद्वये ।
आचण्डालं मनुष्याणाम् अल्पं शास्त्रप्रयोजनम्॥
No शास्त्रम् is required even for a चण्डाल in deciding as to **what is** पुण्यम् **and what is** पापम् ।
सुलभाः पुरुषा राजन् सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य  वक्ता श्रोता च दुर्लभः **--** रामायणम्  ।
विधिवशात् प्राप्तेन संतुष्यताम् **--** मूढ जहीहि धनागमत्रुष्णाम् **–** उपदेशपञ्चकम् **,** शंकराचार्याः ।
सर्वेषामेव शौचानाम् अर्थशौचं परं स्मृतम् ।
यो’र्थे शुचिः स हि शुचिः न मृद्वारिशुचिः शुचिः ॥ **--** मनुस्मृतिः **, 5-106**
प्रायो धनवतामेव धनतृष्णा गरीयसी ।
पश्य  कोटिद्वयासक्तं लक्षाय प्रवणं धनुः ॥ --भोजचरित्रम्
In अध्यासभाष्यम् **(**ब्रह्मसूत्रशांकरभाष्यम् **-- introduction)**
शंकराचार्य **says there is no difference between a**पण्डित **and a** पशु **---**
पश्वादिभिश्चाविशेषात् । यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां संबन्धे सति , शब्दादिविज्ञाने प्रतिकूले जाते ततो निवर्तन्ते , अनुकूले च प्रवर्तन्ते । .....तत्सामान्यदर्शनात् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारः तत्कालः समान इति निश्चीयते।
उत्तमं स्वार्जितं वित्तं मध्यमं पितुरार्जितम् ।
अधमं भ्रातृवित्तं च स्त्रीवित्तमधमाधमम् ॥   --- पञ्चतन्त्रम्
Most of the teachers do teach but do not practice, just like most of the politicians - this has been there since time immemorial -

तत्कारी च भवान् तद् द्वेषी च-- महाभाष्यम् **, '**भावे**' 3-3-18 ,**
**'**समानकर्तृकयोः पूर्वकाले**' 3-4-21, '**तस्यापत्यम्**' 4-1-92 (you do that and you oppose it ) .**
Here are आत्मगुणाः **enumerated by** गोतम **in his** स्मृति **(** प्रश्नः**1** अध्यायः **8** सूत्रम् **24 )** --
दया सर्वभूतेषु क्षान्तिः अनसूया शौचम् अनायासः मङ्गलम् अकार्पण्यम् अस्पृहा इति ।
**What is** अस्पृहा **?**
विवर्जयेदसन्तोषं विषयेषु सदा नरः ।
परद्रव्याभिलाषं च सा'स्पृहा कथ्यते बुधैः॥ (मिताक्षरा )
In a number of instances Patanjali says -- आचार्यः सुहृद्भूत्वा अन्वाचष्टे (आचार्यः **=** पाणिनिः **/** कात्यायनः) |
**Who is a** सुहृत् **?**
Here is शंकराचार्य **(** भगवद्गीताभाष्यम्**, 6-9 ) ---**
सुहृत् इति प्रत्युपकारम् अनपेक्ष्य उपकर्ता, मित्रं स्नेहवान् ।
कर्ता कारयिता चैव प्रेरकश्चानुमोदकः ।
सुकृते दुष्कृते चैव चत्वारः समभागिनः॥ ---पञ्चतन्त्रम्
If one wants to cleanse his mind, he may refuse to accept even a single tomato/ bunch of leafy vegetable more than what is justified by the balance -- start here (I have been practicing this for long -Author ) .
A son / student should, in the first place, be taught वेदान्त , the truth and धर्म ।
जन्मान्तरकृतं पापं व्याधिरूपेण बाधते ।
तच्छान्तिरौषधैर्दानैः जपहोमसुरार्चनैः ॥
One should go for a regular introspection -- **am I behaving like a** सत्पुरुष **or just like a** पशु **? -**प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः ।
किंनु मे पशुभिस्तुल्यं किंनु सत्पुरुषैरिव **?**
गुरोराज्ञा ह्यविचारणीया । दोषा वाच्या गुरोरपि ।

Yes, that is the guideline and one has to strike the balance - but if he is a real गुरु then he may follow 'बालादपि सुभाषितम् '। **कुमारिल , just for a correction ( तत्रापि नोक्तम् - अत्र तु नोक्तम् इति द्विरुक्तम् – this statement is not understood by कुमारिलभट्ट – while he was away प्रभाकर noticed the text stopped by his गुरु i e कुमारिल and corrected as तत्र अपिना उक्तम् – अत्र तुना उक्तम् इति द्विरुक्तम् । कुमारिल came to know this through other शिष्यs ) called his शिष्य a गुरु -- प्रभाकरगुरुः ।**

असत्कार्ये नियोक्तारं गुरुं वापि प्रबोधयेत्।
नातिक्रमेदपि लघुं क्वचित्सत्कार्यसाधकम् ॥ --नीतिशास्त्रम्
प्रविचार्योत्तमं देयं सहसा न वदेत् क्वचित् ।
शत्रोरपि गुणा ग्राह्याःगुरोस्त्याज्यास्तु दुर्गुणाः ॥--- आर्यधर्मः

I had had गुरुs who were receiving parents at odd times and accepting payment for awarding more marks for their children , who otherwise would have failed -- this is simply अधर्म ।

******************************************************************

पदपाठः --

ऋग्वेदस्यास्य मन्त्रस्य (7.59.12) पदपाठो नास्तीति लक्ष्यते ।
(तैत्तिरियसंहितापाठस्य सहमन्त्रस्य किन्त्वस्ति पदपाठः (1.8.6.2)) -------

एकस्यैव मन्त्रस्य ऋग्वेदे पदपाठो नास्ति , यजुर्वेदे त्वस्ति इत्यत्र विनिगमकम् (एकपक्षसाधकयुक्तिः) किमिति भवान् मन्यते ?
नास्तीति लक्ष्यते - इत्यत्र किं बीजमिति नावगम्यते !

ऋग्वेदप्रातिशाख्या **2-1 --**
पदप्रकृतिः संहिता -
पदप्रकृतिभावश्च वृत्तिभेदेन वर्ण्यते ।
पदानां संहिता योनिः संहिता वा पदाश्रया ॥वाक्यपदीयम् ,
वाक्यकाण्डः **- 58**

वृत्तिभेदः = समासभेदः -- षष्ठीतत्पुरुषः बहुव्रीहिर्वा ।
वाजसनेयिप्रातिशाख्या **(1-158)** --
वर्णानामेकप्राणयोगः संहिता
पाणिनीयम् **(1-4-109) --**
परः सन्निकर्षः संहिता
' तैत्तिरिय ' इत्यपशब्दः --
**' तित्तिरिवरतन्तुखण्डिकोखाच्छण् ' (पा 4-3-102) --** तित्तिरिणा प्रोक्तम् तैत्तिरीयम् **(** छन्दोब्राह्मणानि च तद्विषयाणि**-** पा **4-2-66) |**
'सहमन्त्रस्य' - इति को'यं शब्दः ?
There are two पक्षs - अखण्डवाक्यपक्ष and सखण्डवाक्यपक्ष ।
अखण्डवाक्यपक्षः -- वाक्यम् is the very unit of language and the विभाग into पद and वर्ण is artificial . अखण्डवाक्यम्is in the form of स्फोट ( वाचकशब्दः ,वाच्यो'र्थश्च ) -अखण्डवाक्यजातिस्फोट is the सिद्धान्त - जाति to denote many .
Since it is difficult to compile a व्याकरणम् for the वाक्यs , that are used , being used and going to be used ,Panini had come down to पदs (पदस्फोटः) -- since पदs are also innumerable , he came down to प्रकृति-प्रत्ययविभाग ( वर्णस्फोट) .
So वाक्यम् is the real candidate whereas पदs are unreal .This पक्ष is accepted by व्याकरणम् ,योगानुशासनम् and अलङ्कारशास्त्रम् ।
सखण्डवाक्यपक्षः -- वर्णसमुदायः पदम् , पदसमुदायः वाक्यम् ।This पक्ष is advocated by पूर्वमीमांसा , वेदान्त , न्यायवैशेषिक and सांख्य ।
Now Hari raises a question and responds --in case पदs are unreal how can the प्रातिशाख्या -- पदप्रकृतिः संहिता - be justified ? If पदs are unreal then the संहिता (वाक्यम्) that is formed by पदs is also unreal ! So in अखण्डवाक्यपक्ष the quoted प्रातिशाख्य cannot be justified ---

पदप्रकृतिभावश्च वृत्तिभेदेन वर्ण्यते ।
पदानां संहिता योनिः संहिता वा पदाश्रया । **58 ,** वाक्यकाण्डः**,** वाक्यपदीयम्
There is no problem -- for the followers of सखण्डवाक्यपक्ष it is बहुव्रीहि - पदानि प्रकृतिः मूलं यस्याः सा पदप्रकृतिःसंहिता । For the followers of अखण्डवाक्यपक्ष it is षष्ठीतत्पुरुष - पदानां प्रकृतिः मूलं पदप्रकृतिः , संहिता ।
Taking a समास , both as तत्पुरुष and बहुव्रीहि is exhibited by Patanjali in a number of cases across महाभाष्यम्। The problem of खिलपाठ (and some hymns not having पदपाठ etc ) has been there . I discussed the issue in my articles on five वेदs in - ancientindianwisdom,com (Jijyasa Foundation, USA) .
In पाणिनीयधातुपाठ also right from क्षीरस्वामी scholars have been facing problems --
पाठे'र्थे चागमभ्रंशात् महतामपि मोहतः ।
न विद्मः किञ्जिहीमो'त्र किमुपाददमहे वयम् !!
The above verse of क्षीरस्वामी is quoted by माधव (चुरादि) ,दीक्षित and नागेश । (जिहीमः-- ओ हाक् त्यागे) ।
Hari describes the situation as deplorable at that time itself --
प्रायेण संक्षेपरुचीन् अल्पविद्यापरिग्रहान् ।
संप्राप्य वैयाकरणान् संग्रहे'स्तमुपागते ॥ वाक्यपदीयम् **,** वाक्यकाण्डः **, 476**
So it is no surprise if one comes across some Hymns without पदपाठ ।
ॐ त्र्यंबकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान् मृत्योर् मुक्षीय माऽमृतात् । (RV 7.59.12)
अथर्ववेदः - 14/1/17 ( **it is not** अथर्वणवेदः) ; वाजसनेयसंहिता (शुक्लयजुर्वेदः) - 3-60 ; तैत्तिरीयसंहिता (कृष्णयजुर्वेदः)-1-8-6-2 ;निरुक्तम् - 14-35 .

मृत्योः मुक्षीय - अमृतात् मा मुक्षीय ---- मुच्लृ मोक्षणे - तुदादिः
Any other version is bad in व्याकरणम् and निरुक्तम् ।
*****************************************************************

## पुरुषसूक्तस्य उच्चारणा --

ष - ख
You may follow the respective प्रातिशाख्या as far as the छन्दस् / वेद is concerned.
पुरुषसूक्तम् is there in all Vedas (5).
In लोक it is rarely seen --
पाषण्डः -- पाखण्डः --- बौद्धादिः
In भ्वादि , under स्पश बाधनस्पर्शनयोः -- माधवीयधातुवृत्ति says - पाषण्डपाषाणप्रयोगस्तु ' अनुपसर्गात् ' इति कथादेर्भविष्यति ( ? ) ।
सुधाव्याख्या on अमरकोश says --
पापं सनोति , षणु दाने (तनादिः) । सनति , षण संभक्तौ (भ्वादिः) वा । ञमन्ताड्डः (उणादिः 1/114) | पृषोदरादिः(3/1/109) मूर्धन्यमध्यः ।
कवर्गद्वितीयमध्यपाठे तु पाखण्डयति । खडि भेदने (चुरादिः) , अच् (3/1/134) |
पालनाच्च त्रयीधर्मः पाशब्देन निगद्यते ।
तं खण्डयन्ति ते यस्मात् पाखण्डास्तेन हेतुना ।
My father used to say - पान्ति रक्षन्तीति पाः वेदाः, तान् खण्डयति इति पाखण्डः - पाषण्डः।
********************************************************************

## स्वस्तिका --

The term स्वस्तिका is used in पस्पशाह्निकम् **of** महाभाष्यम् in the sense of an ornament made of gold --.... सुवर्णं कयाचिदाकृत्या युक्तं पिण्डो भवति , पिण्डाकृतिम् उपमृद्य 'रुचकाः' क्रियन्ते , रुचकाकृतिम् उपमृद्य 'कटकाः' क्रियन्ते , कटकाकृतिम् उपमृद्य स्वस्तिकाःक्रियन्ते। I do not

have any evidence to claim that स्वस्तिका is an auspicious symbol - it is just a kind of ornament.
स्वस्तिका is a रूढिशब्द and संज्ञाशब्द and it has got nothing to do with the अव्ययम् - ' स्वस्ति ' (स्वस्ति इति मङ्गले – प्रौढमनोरमा - 'स्वरादिनिपातमव्ययम् ' पा सू ) ।
A correction --
स्वस्ति प्रजाभ्यः परिपालयन्ताम्
न्याय्येन मार्गेण महीं महीशाः ।
गोब्राह्मणेभ्यः शुभमस्तु नित्यम्
लोकास्समस्तास्सुखिनो भवन्तु ॥
न्यायादनपेतं न्याय्यम् -- ' धर्मपथ्यर्थन्यायादनपेते ' पा सू **4-4-92** इति यत् प्रत्ययः **-- the one that is not devoid of justice is** न्याय्यम् ।
धर्मादनपेतम् धर्म्यम् **; (** आरोग्य **- )** पथः अनपेतम् पथ्यम् **;** अर्थात् अनपेतम् अर्थ्यम् **; --** अनपेतम् **= not devoid of .**
( गोब्राह्मणेभ्यः = cow etc animals / birds and ब्राह्मण etc human beings -- उपलक्षणम्).
**Bonus Info --**
The entry in some Oxford Dictionaries - ' Aryan -- Sanskrit ' -- is wrong . Webster 1995 gives - ' Sanskrit - Arya ' and it is right .
ऋ **=** गतौ **, '** ऋहलोर्ण्यत् **'** पा सू **3-1-124 --** आर्यः **(** अर्यः स्वामिवैश्ययोः पा सू **3-1-103) ।**
I have stated in ' Theories of Language : Oriental and Occidental ' - that Hitler borrowed स्वस्तिका and आर्य fromमहाभाष्यम् **।**
The only thing is whether the symbol स्वस्तिका of Nazis is the same as the ornament stated / recorded by Patanjali or not.
A शब्द may be used in different senses in different regions - शवति means गच्छति - for the people of कम्बोज whereas for आर्यs शव is a dead body -- पस्पशाह्निकम् **,** महाभाष्यम् **।** So if

the term स्वस्तिका is being used to mean something sacred then put it under पृषोदरादिगण (पृषोदरादीनि यथोपदिष्टम्पा 6-3-109). And also it is not acceptable to tradition to say - ' this word is not employed ' ( अस्त्यप्रयुक्त इति साहसमात्रमेव - पस्पशा.) simply because - महान् शब्दस्य विषयः ( the literature is at once too vast ) and it is also not possible to offer an account of each शब्द and its usage in different senses. We simply follow शिष्टप्रयोग ।

One need not necessarily exhibit an exploded view of a शब्द - what is the प्रकृति and what is the प्रत्यय etc , each time .

Panini was well aware of this problem and so he suggested पृषोदरादि ।

आर्य - is there in पूर्वमीमांसा , व्याकरणम् **(**महाभाष्यम् **, ’ पृषोदरादीनि यथोपदिष्टम् , पा 6-3-109 ) ,** मनुस्मृति **,** अमरकोश **and other** स्मृति**s**.

आर्याः -- अहिंसा परमो धर्मः

Aryans -- ' Aryans are to rule but not to be ruled , close your eyes to pity , behave brutally ....' --- **Hitler on Radio Berlin 1939**.

******************************************************************************

## सामवेदः **---**

Even Panini ordains - do not touch सामवेद (no change is allowed)

What is this?

Except सामवेद, all the वेदs are to be pronounced in एकश्रुति during यज्ञकर्म --

**(**एकश्रुति दूरात् सम्बुद्धौ **1-2-33) --** यज्ञकर्मण्यजपन्यूङ्खसामसु **(1-2-34 )**

एकश्रुतिः स्वरसर्वनाम **,** यथा नपुंसकं लिङ्गसर्वनाम **--** महाभाष्यम् **(**दाण्डिनायनहास्तिनायन**.... 6-4-174 )**

Why यज्ञकर्मणि ? ’ यज्ञे ’ will do ?
व्याप्तिन्यायेन यज्ञमात्रे यथा स्यात् - पञ्चमहायज्ञेष्वपि प्रवृत्तिः ।
Except in जप, न्यूङ्ख ( ओकाराः षोडश - आश्वलायनसूत्रम्) and सामवेद , one should employ एकश्रुति during यज्ञकर्म ।
‘सा ऋक् यत्रार्थवशेन पादव्यवस्था ,गीतिषु सामाख्या –पूर्वमीमांसासूत्रे – अध्या 2 पा 1 अधि 10,11 सू 35,36
ऋग्वेद itself will become सामवेद if गानम् is added.
One साम = 10 ऋक्s etc.
Similarly – वेदानां सामवेदो’स्मि ( भगवद्गीता , **10-22**) etc are to be explained .
Will not the very सामत्व of Samaveda disappear if it is recited in एकश्रुति?
That is right. What Panini means is this --
The त्रैस्वर्यम् can be sacrificed in लोक -- विभाषा छन्दसि (1-2-36) -- optional . But the सामगानम् should not be disturbed.
In यज्ञकर्म it is एकश्रुति for all वेदs except सामवेद ।
तैत्तिरीयाः मन्त्रब्राह्मणयोरुभयोरपि त्रैस्वर्यम् अधीयते । बाह्वृचास्तु मन्त्रे त्रैस्वर्यं ब्राह्मणे तु ऐकश्रुत्यम् - इति विवेकः । शाखाभेदेन व्यवस्था दरीदृश्यते लोके ।
शब्दकौस्तुभ clarifies – since Panini did not make any अधिकारसूत्रम् like ‘ छन्दसि ’ (which means ‘in वेद only) at the beginning of स्वरप्रक्रिया , the स्वर (accent) is there in संस्कृतम् (per se) – i e
स्वर is there in both वैदिकशब्दs and लौकिकशब्दs . The only difference is that there is आदरणा for स्वर in वेद whereas in लौकिकशब्दs स्वर is not used .
*************************************************************************

## स्थितस्य गतिश्चिन्तनीया---

स्थितस्य गतिश्चिन्तनीया-, न गतस्य न वा आगामिनः ।

This न्याय is employed by ***Bhattojidikshita in*** शब्दकौस्तुभ and it is seen in other commentaries also . Some people go on getting worried about the past and go on dwelling too much into the future.
It is against such people that this न्याय is used .
गतं गतम् **(** गतं गतः **- is wrong ) ,** गतं नास्ति-- are generally used about the past (past is past) .
The न्याय may have the following verse from विक्रमार्कचरित्र as the basis --
गते शोको न कर्तव्यो भविष्यं नैव चिन्तयेत् ।
वर्तमानेषु कार्येषु वर्तन्ते हि विचक्षणाः ॥
Here the wordचिन्तनीया **(**चिन्तयेत्**)** is significant -- it does not mean that one should not think
at all about the गतम् or आगामी , but one should not ' worry ' about the past and future --
चिन्ता is dangerous --
चिता चिन्ता द्वयोर्मध्ये चिन्ता नाम गरीयसी ।
चिता दहति निर्जीवं चिन्ता प्राणयुतं पुनः ॥
Kalidasa in शाकुन्तलम् says चिन्ता causes a blurred view – ' चिन्ताजडं दर्शनम् ' ( 4 अङ्कः) ।
चिन्ता is a fever for humans --
चिन्ता ज्वरो मनुष्याणां वस्त्राणाम् आतपो ज्वरः ।
असौभाग्यं ज्वरः स्त्रीणाम् अश्वानां मैथुनं ज्वरः ॥
It is also said that one should be prepared for the worst to come --
चिन्तनीया हि विपदाम् आदावेव प्रतिक्रिया ।
न युक्तं कूपखननं संदीप्ते वह्निना गृहे ॥
Late at night, the king heard the verse being recited by a पण्डित, who was resting on a roadside platform of a house --

वर्षार्थमष्टौ प्रयतेत मासान्
निशार्थमर्धं दिवसे यतेत ।
वार्धक्यहेतोर्वयसा नवेन
परत्र हेतोरिह जन्मना च ॥

So, one should take care of his future also.
Past should not be forgotten –
एकदेशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥ -- says भृगु **in मनुस्मृति , 2-20**

When there is a doubt about the meaning of a word , **Patanjali says -** अर्थाद्वा प्रकरणाद्वा **(**एकः पूर्वपरयोः **, 6-1-81 .**

**The same is elaborated by** भर्तृहरि **--**

संयोगो विप्रयोगश्च **.....** अर्थ प्रकरणं लिङ्गं **......**

शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः **। –315,316 ,** वाक्यकाण्डः **,** वाक्यपदीयम् **। (quoted in all major** अलङ्कारग्रन्थ**s .**

**(** अनवच्छेदः=अनिश्चयः **)**

**Hari (and Punyaraja – 83 ,** वाक्यकाण्डः**.** वाक्यपदीयम् **) listed all the 12 / 24 ( + 12 ,** प्रतिपक्षाः**) of** पूर्वमीमांसा **and illustrated with examples from** लोक **,** वेद **and** शास्त्र **(**व्याकरणम्**).**

The same procedure has to be followed in every instance.
What is the situation?
The scholar, while reading a commentary in some शास्त्रम् / दर्शनम्, came across a statement wherein the न्याय is embedded. He just posted the न्याय and asked for meaning (the example is withheld at this stage).
So one has to explain within the framework of पदवाक्यप्रमाणशास्त्र, taking the लोक as an example.

स्थितस्य -- वर्तमाने क्तः = of the thing that is presently available; गतिः = परिस्थितिः/fate (depends on the प्रकरणम् /context); चिन्तनीया = is to be thought of.
Why to say this?
लोकः --
Some people think too much (and worry) about past things as well as the things of future. So the वर्तमान is not paid proper attention. In day to day, life we come across many such people. There is a war / flood / plane crash / forest fire / accident - in such a situation one has to attend the people survived - i e do something to save them rather than go on doing something to the dead.
It does not mean, one can altogether forget the past and future but one should concentrate more on वर्तमान । Because चिन्ता ( too much thinking / विचारः) about past and future may have its impact on the present condition .
*****************************************************
शब्द **is of six types and** अर्थ **is of 18 types .**
Here the शब्द is प्रतिपादिक and अर्थ is अभिसंहित ।
सर्वं वाक्यं सावधारणं भवति **- is the** न्याय **---**
महाभाष्यम् **--**
अथवा सन्ति एकपदान्यपि अवधारणानि । तद्यथा अब्भक्षो वायुभक्ष इति । अप एव भक्षयति , वायुमेव भक्षयति इति गम्यते । एवमिहापि सिद्ध एव न साध्य इति गम्यते ।
(पस्पशाह्निकम् **'** सिद्धे शब्दार्थ **...'** ; The examples are from वसिष्ठस्मृति (23-33 ,24-4) and याज्ञवल्क्यस्मृति (3-55) ; एकपदानि इति बहुव्रीहिः)

कर्मण्येव द्वितीया, द्वितीयैव कर्मणि ; युष्मदि मध्यम एव , अस्मदि उत्तम एव , एकस्मिन् एकवचनमेव , बहुषु बहुवचनमेव ...( अर्थनेयमे सिद्धम् -वार्तिकम् 1-4-21) |
So स्थितस्यैव गतिरेव चिन्तनीया एव ।
(I am only , coming only , from hostel only – I am coming from hostel).
Is it a विधि or नियम ?
It is a नियम ( परिसंख्या ) --
मीमांसा--
तत्र चान्यत्र च प्राप्ते परिसंख्या निगद्यते -- पञ्च पञ्चनखा भक्ष्याः |
In व्याकरणम् it is called नियम (पस्पशाह्निकम् ,महाभा.) whereas in मीमांसा it is परिसंख्या ।
Thinking about past present and future is प्राप्त - then the नियम - think about the present
( condition / person /समास etc which is there as शिष्टप्रयोग ) - depending upon the प्रकरणम् / context etc .
**********************************************************************

## माया ---

1. मायायामण् (पा 4-4-124) - पदम‘ज्जरी ---

मीयते अनया इति माया = असदर्थप्रकाशनशक्तिः । माङः औणादिको यः ।
(आसुरी माया - ’असुरस्य स्वम् ’ इति यतं बाधित्वा अण् )
2. माधवीयधातुवृत्तिः -- अदादिः --
मा माने --- सर्वेषु माग्रहणेषु मा- मेङ् - माङ् ग्रहणम् , ’ गामादाग्रहणेष्वविशेषः ’ इति वचनात् । मातीति मायः
- ‘श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च ’ (पा 3-1-141) इति णे युक् । माया - स्त्रियां टाप्।

3.अमरकोशः --

स्यान्माया शाम्बरी (2-10) --
विश्वं माति यस्याम् , मिमीते वा । मा माने (अदादिः) , माङ् माने (जुहोत्यादिः) - ' माच्छाससिभ्यो यः ' (उणादि 4-109) ; मां यातीति वा , ' आतो'नुपसर्गे कः ' (पा 3-1-3) इति कः ।
4..सर्वदर्शनसंग्रहः - शैवदर्शनम् ---
मात्यस्यां शक्त्यात्मना प्रलये सर्व जगत्सृष्टौ व्यक्तिमायातीति माया । यथोक्तं श्रीमत्सौरभेये --
शक्तिरूपेण कार्याणि तल्लीनानि महाक्षये ।
विकृतौ व्यक्तिमायाति सा कार्येण कलादिना ॥ इति ।
5. शिवसूत्रम् (3-3)- कलादीनां तत्त्वानाम् अविवेको माया ।
*****************************************************************

## चातुर्वर्ण्यम् --

The process of सृष्टि of चातुर्वर्ण्यम् is explained in बृहदारण्यकोपनिषत् **(1/4/11-15)** --
ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्न व्यभवत् ।
तच्छ्रेयोरूपमत्यसृजत क्षत्रम् .....। स नैव व्यभवत् स विशमसृजत ...।
स नैव व्यभवत् स शौद्रं वर्णमसृजत पूषणमियं वै पूषेयं हीदं सर्वं पुष्यति यदिदं किंच ।
स नैव व्यभवत् तच्छ्रेयोरूपम् असृजत धर्मम् ......। तदेतत् ब्रह्म क्षत्रं विट् शूद्रः .... ।
(इयं भूमिः पूषा इत्यर्थः)
शाङ्करभाष्यम् --
..... वर्णा आश्रमाश्च तत्र के वर्णा इत्यत्र इदमारभ्यते ।
......अग्निरूपापन्नं ब्रह्म ब्राह्मणजात्यभिमानात् ब्रह्मेत्यभिधीयते । वा इदंक्षत्रादिजातं ब्रह्मैव अभिन्नम्
आसीदेकमेव । नासीत् क्षत्रादिभेदः । तद्ब्रह्मैकं
क्षत्रादिपरिपालयित्रादिशून्यं सन्न व्यभवत् न विभूतवत्कर्मणे नालमासीदित्यर्थः ।..

क्षत्रे सृष्टे’पि स नैव व्यभवत् कर्मणे ब्रह्म तथा न व्यभवत् वित्तोपार्जयितुरभावात् । स विशमसृजत कर्मसाधनवित्तोपार्जनाय ।......
सपरिचारकाभावात् पुनरपि नैव व्यभवत् स शौद्रं वर्णमसृजत शूद्र एव शौद्रःस्वार्थे’णि वृद्धिः । कः पुनरसौ शूद्रो वर्णो यः सृष्टः पूषणं पुष्यतीति पूषा ।
स चतुरः सृष्ट्वापि वर्णान् नैव व्यभवत् उग्रत्वात् क्षत्रस्य अनियताशङ्कयातच्छ्रेयोरूपमपि असृजत किं तद्धर्मं तदेतत् श्रेयोरूपं सृष्टं .....।
...धर्मात् परं नास्ति । तेन हि नियम्यन्ते सर्वे । कथम् ......।
तदेतत् चातुर्वर्ण्यं सृष्टं ब्रह्म क्षत्रं विट् शूद्र इत्युत्तरार्थ उपसंहारः ।
आनन्दगिरिः--
कर्तृ - पालयितृ - धनार्जयितृणां सृष्टत्वात् कृतं वर्णान्तरसृष्ट्याइत्याशङ्क्याह - स परिचारकेति । ..... ननु चातुर्वर्ण्ये सृष्टे तावतैवकर्मानुष्ठानसिद्धेः अलं धर्मसृष्ट्या इत्यत आह - स चतुर इति ।...
So the purpose is served by चातुर्वर्ण्यसृष्टि followed by धर्म । In देवलोक and मनुष्यलोक ।
If I have some work to be performed I would engage one / two /three people required but never the number that is more than sufficient .
श्रुति says - produce ten children only - why should one go for the eleventh child ?
श्रुतिः प्रमाणम् - नात्र कर्ता । कः प्रष्टव्यः ? तर्क एव शरणम् ।
Following अशोकवनिकान्याय , one may decide his need and that cannot be questioned from a different point of view .
Where to put सीता ? Put her under an आम्रतरु (mango tree) . Why not under a वटवृक्ष

( banyan tree)? Okay . Why not underan अशोकतरु ? --- there will be no end and it is called अव्यवस्था , which is a दोष । She should be put under some tree or the other!
How can गुण**s that are** परस्परविरुद्ध stay together in a single अधिष्ठानम्?
This is established ---
**सांख्यदर्शनम् ( श्लो 13)** ---
सत्त्वं लघु प्रकाशकमिष्टमुपष्टंभकं चलं च रजः ।
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो व्रुत्तिः ॥
**सांख्यतत्त्वकौमुदी of वाचस्पतिमिश्र --**
ननुपरस्परविरोधशीला गुणाः सुन्दोपसुन्दवत् परस्परं ध्वन्सन्ते इत्येव युक्तंप्रागेव तेषामेकक्रियाकर्त्रुताया इत्यत आह -
प्रदीपवच्चार्थतो वृत्तिः इति ।
दृष्टमेतत् , यथा वर्तितैले अनलविरोधिनी अथ च मिलिते सहानलेन रूपप्रकाशलक्षणं कार्यं कुरुतः यथा वा - वातपित्तश्लेष्माणः परस्परविरोधिनः शरीरधारणलक्षणकार्यकारिणः एवं सत्त्वरजस्तमांसि मिथो विरुद्धान्यपि अनुवर्त्स्यन्ति स्वकार्यं करिष्यन्ति च ।
**योगानुशासनम् (2-18) - भाष्यम् --**
रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुद्ध्यन्ते सामान्यानि त्वतिशयैः सह प्रवर्तन्ते ।
( तुल्यबलानामेव विरोधः नातुल्यबलानाम् इत्यर्थः )।
**देवीभागवतम् ( 3-9) - ब्रह्मगीतम् -- नारदं प्रति ब्रह्मवाक्यानि** --
प्रदीपश्च यथा कार्यं प्रकरोत्यर्थदर्शनात् ।
वर्तिस्तैलं यथार्चिश्च विरुद्धाश्च परस्परम् ॥
विरुद्धं हि तथा तैलमग्निना सह सङ्गतम् ।
तैलं वर्तिविरोध्येव पावको’पि परस्परम् ॥
There are भेदाभेदौ in विशिष्टाद्वैतम् and it is not acceptable due to श्रुतिविरोध ।
*****************************************************************

## तन्त्रम् --

Meaning of the term तन्त्रम् --

तनु = विस्तारे , ष्ट्रन् (उणादि 4-159)
व्याकरणतन्त्रम् (वाक्यपदीयम्.), अस्मिन् पाणिनीयतन्त्रे ( नागेशः , परिभाषेन्दु.) , तन्त्रवार्तिकम्
( मीमांसा) , तन्त्रयुक्तिः (आयुर्वेदः , अर्थशास्त्रम्), सर्वतन्त्रस्वतन्त्रः ( नागेश etc) , 'स्वतन्त्रः कर्ता ’
(पा सू **1-4-54**) etc .
यत्सकृत्कृतं बहूनामुपकरोति तत्तन्त्रमित्युच्यते -- शाबरभष्यम् ( मी सू 11-4-1)
तथापि महाजनपरिगृहीतानि महान्ति सांख्यादितन्त्राणि ....
सम्यग्दर्शनाय उपादेयानीत्यपेक्षा - ब्रह्मसूत्रशाङ्करभा **. 2-2-1 .**
Same is the case with the term 'आगम ’also - it can be वेद or any शास्त्रम् or शैवागम etc
If the उपनिषत्s say that ब्रह्मन् is the cause of the universe while नागेश , following some
तन्त्रग्रन्थ , says (लघुमञ्जूषा) it is नाद - बिन्दु etc which is to be taken as प्रमाणम् ? Is नागेश not going against वेद ?
युक्तियुक्तं वचो ग्राह्यं न ग्राह्यं गुरुगौरवात् ।
सर्वशास्त्ररहस्यं तद् याज्ञवल्क्येन भाषितम् ॥ – याज्ञवल्क्यशिक्षा - 232 ।
We did not accept the भाष्यम् of Samkaracarya on
अपरस्परसंभूतम् ( गीता 16-8 ) ।
The शास्त्रैक्यम् of Ramanujacarya in श्रीभाष्यम् and some other aspects ( जातिin
निर्विकल्पक etc ) go against मीमांसा ।
The सौन्दर्यलहरी (श्लोक 31 ) itself is not strongly established with evidence to be a work
of Jagadguru Samkaracarya..

The Samkaracarya of Gaudadesa authored a तन्त्रग्रन्थ called तारारहस्यवृत्तिका ।

Even if a scholar enumerates the तन्त्रs , it does not mean that one should / can practice
the same .That goes against मीमांसा --
There are some अभिचारमन्त्रs ( some are quoted by तान्त्रिकs) in अथर्ववेद । Does it mean that वेद ordains one to perform अभिचारहोम ? (अभिचारः = हिंसा ) । It is for information .
Sabarasvamy clarifies --
चोदनालक्षणो'र्थो धर्मः (पू मी सू **1-1-2** )
उभयमिह चोदनया लक्ष्यते अर्थः अनर्थश्चेति । ..... को'नर्थः ? यः प्रत्यवायाय श्येनो वज्र इषुरित्येवमादिः । ....
कथं पुनरसावनर्थः ? हिंसा हि सा । हिंसा च प्रतिषिद्धेति । कथंपुनः अनर्थः कर्तव्यतया उपदिश्यते ? उच्यते ।
नैव श्येनादयः कर्तव्या विज्ञायन्ते । यो हि हिंसितुम् इच्छेत् तस्यायमभ्युपाय इति हि तेषामुपदेशः । ' श्येन अभिचरन् यजेत ' इति हि समामनन्ति । न ' अभिचरितव्यम् " इति ।
वेद says - मा हिंस्यात् सर्वा भूतानि and also वायव्यं श्वेतमालभेत भूतिकामः' । Here it is clarified by
मनुस्मृति , शङ्कराचार्य etc that यागीयहिंसा , since ordained by वेद itself , is acceptable . Same is the case with सोमपानम् , मैथुनम् also . Outside वेद these three are not acceptable - this is the सिद्धान्त।
वाक्यार्थनिर्णय has to be done with the help of पूर्वमीमांसा / वाक्यशास्त्रम् ।
Just like in the case of सन्ध्यावन्दनम् , wherein मुद्राs etc are added , with a caution - मुद्रारहिता गयत्री निष्फला भवेत् , the

original सात्त्विकं तपः is modified and made तामसम् ( भगवद्गीता - 17 ) .
There are many verses across तन्त्रग्रन्थs which directly or indirectly generate द्वेष against वेद।
What we say is do not go for मकारपञ्चकम् etc . The other types of पूजा is not at all negated.
एकः परमात्मा । ईश्वरास्सप्त । असंख्या जीवाः ।
ब्रह्मविष्णुशिवसूर्यगणेशशक्तिभैरवाश्चेश्वराः ।
पारानन्दे मते त्रयो मार्गाः। दक्षिणः ।वामः । उत्तरः । तथैव गाथामुदाहरन्ति।
दक्षिणादुत्तमं वामं वामादुत्तरमुत्तमम् ।
उत्तरादुत्तमं किंचिन्नैव ब्रह्माण्डमण्डले ॥
वामाचारो द्विप्रकारो मध्यमोत्तमभेदेन ।
मद्यमैथुनमुद्राभिर्युक्तोऽसावुत्तमः स्मृत इति
मद्यमंसमत्स्यमुद्रामैथुनैर्युक्तो मध्यमः। --- पारानन्दसूत्रम् **, pp 1-3 ; 13**
वैष्णवादुत्तस्मं शैवं शैवाद्दक्षिणमुत्तमम्।
दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम् ।
सिद्धान्तादुत्तमं कौलं कौलात्परतरं न हि ॥ ---- कुलार्णवतन्त्रम् **, 2-7,8**

All the तन्त्रग्रन्थs are अवैदिक and अशिष्टाचारप्रवर्तित । They say the purpose is ' easy मोक्ष ’।
There are great scholars like भास्करराय who are influenced by तन्त्रम् ।
Those who find repose in वैदिकधर्म should keep themselves aloof from all so called तन्त्रs .Some scholars argue - दक्षिणाचार is वैदिक whereas वामाचार is तान्त्रिक ( for some both are different procedures within तन्त्र ) । No doubt , it is confusing .

Why such a caution ?

- As has already been mentioned , even great scholars fell prey to तन्त्रसिद्धान्तs --

In कारणत्वाधिकरणम् **(ब्रह्मसूत्रशांकरभाष्यम् 1-4-14) Samkaracarya took up** विगानम् **(different** उपनिषत्**s offering different causes of** सृष्टि **-** विरुद्धं गानम्**) and clearly stated** -
विगानदर्शनात्। प्रतिवेदान्तं ह्यन्यान्या सृष्टिरुपलभ्यते , क्रमादिवैचित्र्यात् । ......कार्यविषयं तु विगानं दृश्यते .... । न च कार्यविषयेण
विगानेन कारणमपि ब्रह्म सर्ववेदान्तेषु अविगीतम् अधिगम्यमानम् अविवक्षितं भवितुमर्हतीति वक्तुं शक्यम् , अतिप्रसङ्गात्।.... उपक्रमोपसंहाराभ्यां तत्र ब्रह्मविषयवाक्यैः साकमेकवाक्यताया गम्यमानत्वात् । **.....** तथा च संप्रदायविदो वदन्ति **--**
मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदितान्यथा ।
उपायस्सो'वताराय नास्ति भेदः कथञ्चन ॥ **(** मांडूक्यकारिका **3-25)**
So by and large ,ब्रह्मन् is the उपादानकारणम् ( also निमित्तकारणम् ) of this जगत् ।
But , **having all this down to** भामतीकल्पतरुपरिमळ **on the tip of the tongue ,** नागेशभट्ट **(** लघुमञ्जूषा **-** सृष्टिक्रमः**) borrowed** नाद **-** बिन्दु **etc from** शारदातिलकम् **( a** तन्त्रग्रन्थः**)** ।
Similar is the case with भास्करराय also - why should he embrace तन्त्रम् at all ?
**'** महतामपि मोहतः **'** - क्षीरस्वामी ।
Here is मधुसूदनसरस्वती **in** प्रस्थानभेदः **--**
सर्वेषां च् संक्षेपेण त्रिविध एव प्रस्थानभेदः - तत्र आरंभवाद एकः , परिणामवादो द्वितीयः , विवर्तवादस्तृतीयः । .....सर्वेषां प्रधानकर्तॄणां मुनीनां विवर्तवादपर्यवसानेन परमेश्वर एव प्रतिपाद्ये तात्पर्यम् । न हि ते मुनयो
भ्रान्ताः, सर्वज्ञत्वात् तेषाम् ।

किन्तु बहिर्विषयप्रवणानाम् आपाततः पुरुषार्थे प्रवेशो न संभवतीति नास्तिक्यवारणाय तैः प्रकारभेदाः प्रदर्शिताः।
तत्र तेषां तात्पर्यम् अबुद्ध्वा वेदविरुद्धे’पि अर्थे तात्पर्यम् उत्प्रेक्षमाणाः तन्मतमेवोपादेयत्वेन गृह्णन्तो जनाः नानापथजुषो भवन्ति । (जुषी = प्रीतिसेवनयोः )
यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यत् विजानाति स भूमा । अथ यत्र अन्यत् पश्यति अन्यत् शृणोति अन्यत् विजानाति तदल्पम् ।यो वै भूमा तदमृतम् । अथ यदल्पं तन्मर्त्यम् । ---- छान्दोग्योप **, 7 - 2-41**
Why पाञ्चरात्रागम , the स्मृति that follows the श्रुति , is being refuted ? Samkaracarya(ब्र सू **2-2-42 ,** उत्पत्त्यसंभवाधिकरणम् **/** पाञ्चरात्राधिकरणम् **)** responds that since there are certain things , which are अवैदिक , so the refutation --
ननुश्रुतिसमाश्रणेनापि एवंरूप एवेश्वरः प्राङ्निर्धारितः -प्रकृतिश्चाधिष्ठाता चेति , श्रुत्यनुसारिणी स्मृतिः प्रमाणमिति स्थितिः। तत् कस्य हेतोः एष पक्षः प्रत्याचिख्यासित इति । उच्यते - यद्यपि एवंजातीयकः अंशः समानत्वात् न विसंवादगोचरो भवति । अस्ति तु अंशान्तरं विसंवादस्थानम् इत्यतः तत्प्रत्याख्यानाय आरम्भः।
There is कौलाचार and in Buddhism there is तन्त्रम् ।
The founders and propagators of different तन्त्रग्रन्थs are so strong that they quote from different उपनिष्त्s and दर्शनs and try to lure people into तान्त्रिकविद्या , which is actually अविद्या / क्षुद्रविद्या ।
Some scholars are asking about the अधिकार **for** द्विजेतर**s --**
There is साधनचतुष्टयम् enumerated by Samkaracarya inजिज्ञासाधिकरणम् **(** ब्र सू शां भा **1-1-1 ) --**
नित्यानित्यवस्तुविवेकः **,** इहामुत्रार्थफलभोगविचारः **,** शमदमादिसाधनसंपत् **,** मुमुक्षुत्वं च ।

**’ ज्ञानमात्रे यद्यपि सर्वाश्रमिणाम् अधिकारः ’ (**
**मुण्डकोपनिषद्भाष्यपीठिका ) - declares Samkaracarya.**
Vidura and Dharmavyadha are अद्विजs .सुलभा , मैत्रेयी and गार्गी are ladies .
स्त्रियो वैश्यास्तथा शूद्राः ते’पि यान्ति परां गतिम् **( भगवद्गीता , 9-32)**
So if one has got the above said साधनचतुष्टयम् , even if he / she is an अद्विज , can try for मोक्ष ।
Quoting Ramayanam etc --
दुःखेन बुबुधे सीतां हनुमाननलंकृताम् ।
संस्कारेण यथा हीनां वाचमर्थान्तरं गताम् ॥ (सुन्दरकाण्डः **15-39** )
This is through व्यतिरेक ।
संस्कारेण = शिक्षाव्याकरणसंस्कारेण ।
( हनूमान् इति शब्दः - ’ शरादीनां च ’ पा 6-3-120 , इति संज्ञायां मतौ दीर्घः ) |

Through अन्वय --
संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च ( कुमारसंभवम् **, 1-28** )
तया = पार्वत्या ; सः = हिमवान्
From Ramayanam -
बहु व्याहरतानेन न किञ्चिदपभाषितम्
Speaking at length is not a दोष (defect) -- Patanjali clarifies ---
वाचो ग्मिनिः पा 5-2-124 , आलजाटजौ बहुभाषिणि पा 5-2-125
’ बहुभाषिणि ’is made अपकर्ष into वाचो ग्मिनिः ---
भाष्यम् ( 5-2-125) --
" यो हि सम्यग् बहु भाषते वाग्मी इत्येव स भवति "।
यः कुत्सितं बहु भाषते सः - वाचालः / वाचाटः ( ’ चितः ’ पा 6-1-157 अन्तोदात्तः )

' स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् ' - अमरः ।
**************************************************************************

देवः पश्वादिद्वारा स्वाज्ञां प्रवर्तयति --

The above statement is not correct -- just go through
वैषम्यनैर्घृण्याधिकरणम् **( 2-1-34) of** ब्रह्मसूत्रशांकरभाष्यम् **--**
सापेक्षो हीश्वरो विषमां सृष्टिं  निर्मिमीते । किमपेक्षते इति चेत्
धर्माधर्मौ अपेक्षते इति वदामः ।  अतः
सृज्यमानप्राणिधर्माधर्मापेक्षयाविषमा सृष्टिरिति नायमीश्वरस्य
अपराधः। यथा हि पर्जन्यो व्रीहियवादिसृष्टौ साधारणं करणं भवति ।
देवमनुष्यादिवैषम्ये तु तत्तज्जीवगतान्येव असाधारणानि कर्माणि
कारणानि भवन्ति ।

God does not have either love or hatred against anybody - is the
सिद्धान्त ।

God is due to माया but above  माया whereas मनुष्य is within
माया ।

Things - vicissitudes do happen  followingकर्मफलम् ( nemesis) .
Common people also say - God has given / not given something
to someone - here one may interpret - God means विधि / कर्म ।

1. Adi Samkara said नहि नहि रक्षति डुकृञ् करणे (मोहमुद्गरः) and शब्दजालं महारण्यं चित्तभ्रमणकारणम्  ( विवेकचूडामणिः) ।

   He was protected by a lion from Kapalika's evil intention of human sacrifice.

B. Panini the Father of Vyakaranasutras was killed by a lion.
Is there a connection between A and B? What is God's
intention?

वेदान्तः - मीमांसा - योगानुशासनम् - व्याकरणम् - ज्योतिषम्

If a lion did not charge / attack Samkara it is due to अहिंसा ---

अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः **- योगसूत्रम् 1-35**
Why Panini was killed by a lion ? - this is not a big question and will be answered later .
नहि नहि रक्षति डु कृञ् करणे ( मोहमुद्गरः)
शब्दजालं महारण्यं चित्तभ्रमणकारणम् ( विवेकचूडामणिः )
--- what is the तात्पर्यम् of Samkara ?
What is the problem ? --
Samkaracarya , under शास्त्रयोनित्वात् **( ब्र सू 1-1-3 )** praises Panini --
यथा व्याकरणादि पाणिन्यादेः ज्ञेयैकदेशार्थमपि स
ततो’प्यधिकतरविज्ञानमय इति प्रसिद्धं लोके।
Also under तर्काप्रतिष्ठानात् **....... ( 2-1-11)** Samkaracarya quoted वाक्यपदीयम् **( 1-34) verbatim** , which is pivotal to the interpretation of the सूत्रम् --
यत्नेनानुमितो’प्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैः अन्यथैवोपपद्यते ॥
शां भा --
तथाहि - कैश्चिदभियुक्तैः यत्नेनोत्प्रेक्षिताः तर्काः अभियुक्ततरैः अन्यैः आभास्यमाना दृश्यन्ते ।
And there are other examples where Samakara had directly taken statements from महाभाष्यम्।
Now the question is - having earned good command on व्याकरणम् and quoted statements, how can Samkara simply say that the same system cannot protect one ? Also it is difficult to understand शांकरभाष्यम् without proper command on Panini !
So , there is स्वग्रन्थविरोध ? No , since you did not apply the relevant मीमांसान्याय it seems like that --

apply नहिनिन्दान्याय **from** शाबरभाष्यम् **of** शाखान्तराधिकरणम् **(2-4-2-21) ---**
न्यायशरीरम् **--**
नहिनिन्दा निन्द्यं निन्दितुं प्रयुज्यते । किं तर्हि **?**
निन्दितादितरत्प्रशंसितुम् । तत्र न निन्दितस्य प्रतिषेधो गम्यते किन्त्वितरस्य विधिः ।
The sentences of condemnation are not meant to condemn the condemnable – rather they are meant to commend the commendable ( there are only two kinds of sentences in any literature – विधि (Injunction – do it ) and प्रतिषेध ( Censure – do not do it ) . And the sentences of स्तुति (commendation) called स्तुत्यर्थवाद are to be construed with विधि whereas the sentences of निन्दा ( condemnation) called निन्दार्थवाद are to be construed with प्रतिषेध ।
(one may take प्रतिषेध as प्रतिषेधविधि ) ।
रामायणम् is a वेद -- there we come across रावणनिन्दा - so we get द्वेष against रावण from
a वेद ! But following नहिनिन्दान्याय ,रावणनिन्दा is not for रावणनिन्दा but for रामस्तुति । So our minds are not polluted by रामायणवेद । Same is the case with महाभारतम् also .
**In the present case Samkaracarya's** तात्पर्यम् **is - not in** व्याकरणनिन्दा **but in** वेदान्तस्तुति ।
गोविन्दभजनम् **will protect you** परम्परया **-** भक्तिः ज्ञानाय कल्पते **-** ज्ञानादेव तु कैवल्यम् **-** मोक्षमिच्छेत् जनार्दनात् ।
चित्तभ्रमणकारणम् - is also the same .
Why Panini was killed by a lion? Jaimini by a crocodile? Pariksit by Taksaka?
सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः ( हितोपदेशः ।

It is a sorry state of affairs - ज्योतिषम् is completely forgotten - put on back burner - not recently but long ago - by वैयाकरणाः / मीमांसकाः /नैयायिकाः / वेदान्तिनः etc - they miserably failed --
भूयोभिः पटुबुद्धिभिः पटुधियां होराफलज्ञप्तये
शब्दन्यायसमन्वितेषु बहुशः शास्त्रेषु दृष्टेष्वपि ।
होरातन्त्रमहार्णवप्रतरणे भग्नोद्यमानामिदं
स्वल्पं वृत्तविचित्रमर्थबहुळम् शास्त्रप्लवं प्रारभे ॥
**(वराहमिहिराचार्यः ,बृहज्जातकम् -2)**
ज्योतिषं नेत्रमुच्यते / ज्योतिषामयनं चक्षुः ( वेदपुरुषस्य) – शिक्षा **(पाणिनीयशिक्षा)**
It is a fact that to command जातकस्कन्ध is not a joke - besides mathematics thousands of things are to be kept in memory and ultimately it is वाक्शुद्धि that prevails.

I have studied 3000 horoscopes ( give or take a thousand) during 1977-1994.
षष्ठेश्वरे भानुसुते सराहुकेतौ मृगाद्भीतिमुदाहरन्ति ।
जीवेन युक्ते गजभीतिमस्य जातस्य चन्द्रेण युतेऽश्वभीतिः ॥
--- सर्वार्थचिन्तामणिः ,नवमाध्यायः , 24
If the lord of sixth place is associated with राहु or केतु then there will be मरणभीति ,i e death , from animals , with गुरु from elephant, with चन्द्र from horse .
Eighth house ( अष्टमम् आयुःस्थानम्) and the planet , प्रबलपाप in eighth house are also to be checked as per जैमिनिसिद्धान्त ।
But there is also Upanisadic Vakya -यतो वाचो निवर्तन्ते अप्राप्य मनसा सह (तैत्तिरीयोपनिषत् – ब्रह्मानन्दवल्ली )
it is telling us Brahman cannot be grasped by words and thoughts. Both words and mind cannot even reach Brahman. Then what are Vedas and Vedanta describing? They are saying

things
like अयमात्मा ब्रह्म, प्रज्ञानं ब्रह्म, तत् त्वम् असि, अहं ब्रह्मास्मि and so on. What is this Brahman they are describing?
The answer is they are describing उपहित ब्रह्म but not शुद्ध ब्रह्म.
The शुद्ध ब्रह्म cannot be grasped by words and thoughts. There is no word in the entire universe with वाच्यार्थ for Brahman. Someone may say the word 'Brahman' itself is sufficient to express Brahman. But the word cannot directly describe Brahman but only through लक्ष्यार्थ.
It is 'नहिनिन्दान्यायः ' ( the words are not to be split) - ' नहिनिन्दा' in the समास is an अनुकरणम् of न्यायशरीरैकदेश -- ' मतौ छः सूक्तसाम्नोः ' (पा 5-2-59) |

**श्रुतिः - वेदान्तः - योगानुशासनम् - वाक्यपदीयम् - खण्डनखण्डखाद्यम्**
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह - तैत्तिरीयोपनिषत् - ब्रह्मानन्दवल्ली
Certain things can be experienced but cannot be explained - just take an example like a mango - how is the mango ? it is sweet -- that's all - there cannot be any more words to explain ! Nor this word can explain the experience at a satisfactory level - the only way is to experience it.
In वाक्यपदीयम् ,वाक्यकाण्ड , **Hari** explains प्रतिभा in the same manner ---
असमाख्येयतत्त्वानाम् अर्थानां लौकिकैर्यथा ।
व्यवहारे समाख्यानं तत्प्राज्ञो न विकल्पयेत् ॥142 -

A scholar should not disturb the established pattern of a thing that cannot be defined as such and such but being described by people in day to day life.
इदं तदिति सान्येषाम् अनाख्येया कथंचन ।
प्रत्यात्मवृत्तिसिद्धा सा कर्त्रापि न निरूप्यते ॥144 -
This प्रतिभा cannot be explained to others as this and that by any means . It is born out of experience of each person and that cannot be defined even by the person who had had the experience.
In जन्माद्यधिकरणम् ,Samkaracarya clearly says that - finally it is अनुभव by which one can realize ब्रह्मन् and in this case श्रुति etc are also प्रमाणम् --
वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम् । वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्ते । वाक्यार्थविचारणाध्यवसायनिर्वृत्ता हि ब्रह्मावगतिः । ....... न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणम् ब्रह्मजिज्ञासायाम् , किन्तु श्रुत्यादयः अनुभवादयश्च यथासंभवम् इह प्रमाणम्, अनुभवावसानत्वात् , भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य ।
**श्रीहर्ष in खण्डनखण्डखाद्यम् -**
अन्योन्याभावसंसर्गाभावयोर्भेदखण्डनम् **says --**
मम चानिर्वचनीयतैव प्रतीतिव्यवहरव्यवस्थापर्यनुयोगबाणवारणायवज्रवारवाणायमाना विजयते । मम त्वेवं दर्शनम् -
प्रतीतिप्रसिद्धत्वात्अत्यन्तासद्विलक्षणं भवदपि जगत्तथा सत्तोपगमे'पि बाध्यमानत्वात्अनिर्वचनीयम् इति । **(**वारवाणम् = कवचः**)**
व्यापारलक्षणखण्डनम् --
बाधे'दृढे'न्यसाम्यात् किं दृढे'न्यदपि बाध्यताम् ।
क्व ममत्वं मुमुक्षूणाम् अनिर्वचनीयवादिनाम् ॥
तथा हि मिथिलानाथो मुमुक्षुर्निर्ममः पुरा ।

आहेदं मिथिलादाहे न मे किञ्चन दह्यते ॥ ( जनकः भारते एवमुक्तवान्)
Here is his सिद्धान्त --
वस्तुतस्तु वयं सर्वप्रपञ्चसत्त्वासत्त्वव्यवस्थापनविनिवृत्ताःस्वतःसिद्धे चिदात्मनि ब्रह्मतत्त्वे केवले भारमवलम्ब्य चरितार्थाःसुखमास्महे । ये तु स्वपरिकल्पितसाधनदूषणव्यवस्थया विचारमवतार्य तत्त्वंनिर्णेतुमिच्छन्ति , तान् प्रति ब्रूमः - ' न साध्वीयं भवतां विचारव्यवस्था , भवत्कल्पितव्यवस्थयैव व्याहतत्वात् ' ।
( in the above lines Sriharsa refutes by resorting to the हेत्वाभास **called** स्ववचोव्याघात **)**
**So , according to Sriharsa** ब्रह्मन् **is** सदसद्विलक्षणं अनिर्वचनीयम्।
*****************************************************************

## भेदःअभेदश्च --

तस्य वाचकः प्रणवः ( यो सू)
That is right --
there are two approaches -- भेद and अभेद between शब्द and अर्थ ----
if we say --
ओमित्येकाक्षरं ब्रह्म / वृद्धिरादैच् / अमरा निर्जरा देवाः**-- it is** अभेदपक्ष - तादात्म्यसंबन्धः ।
रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः **... also. (** भेदसहिष्णुः अभेदः तादात्म्यम् **)** ।
**If we say --**
तस्य वाचकः प्रणवः **/** वृद्धिशब्दस्य आदैचः अर्थः **/** अमरशब्दस्य निर्जराः **/** देवाः अर्थः **- it is** भेदपक्ष **-** वाच्यवाचकभावः संबन्धः।
The great universal norm 'पञ्चकं प्रातिपदिकार्थः ' ( a प्रातिपदिकम् denotes five meanings ) - clearly mentioned by Patanjali under ' कुत्सिते ' पा 5-3-74 ( वैयाकरणभूषणम् **-** नामार्थविचारः ) ---

1. स्वार्थः ( स्वः अर्थः ) - जातिः - गौः ; गुणः - शुक्लः ; क्रिया - पाचकः ; संबन्धः - राजपुरुषः ; स्वरूपम् - डित्थः । 2.द्रव्यम्
3.लिङ्गम्4.संख्या 5. कारकम्
So, since वाक् / शब्द cannot denote ब्रह्मन् , ' पञ्चकं प्रातिपदिकर्थः ' does not apply.
The highest pramāṇa being śruti, here is a śruti in support of tasyavācakaḥ praṇavaḥ.
om khaṃ brahma .......om tatsat ।
*This is right* .वाच्यवाचकसंबन्धपक्षाश्रयणे ब्रह्मणः नामनिर्देशः |
*****************************************************************

संन्यासिनां कर्मानुष्ठनम् **---**

पाणिनीयम् - धर्मशस्त्रम् - वेदान्तः - पूर्वमीमांसा - भगवद्गीता
पाणिनिसूत्रम् --
मस्करमस्करिणौ वेणुपरिव्राजकयोः 6-1-149
( ताच्छील्ये णिनौ प्राप्ते इनिर्निपात्यते )
महाभाष्यम् --
मा कृत कर्माणि मा कृत कर्माणि शान्तिर्वः श्रेयसीत्याह , अतो मस्करी परिव्राजकः ।
प्रदीपः --
'अयं मा कृत - अयं मा कृत ' इत्युपक्रम्य उपशान्तितः काम्यकर्मपरिहानिःयुष्माकं श्रेयसी इत्युपदेष्टा मस्करीत्युच्यते । माङ्पूर्वात् करोतेः इनिः। सुडागमः , माङो ह्रस्वश्च निपात्यते ।
उद्योतः --
अयं मा कृतेति । ' अयं त्यक्तवान् अयं त्यक्तवान् कर्माणि 'इत्युपक्रम्य स्वयं कर्माणि परित्यज्य परान्प्रत्येवम् उपदेष्टा इत्यर्थः ।भाष्ये - ' कर्म ' शब्देन काम्यकर्माण्युच्यन्ते। नित्यनैमित्तिकानि तुमुमुक्षोरपि कर्तव्यान्येव । अत एव काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः इति गीतायामुक्तमिति भावः ।
पदमञ्जरी ( काशिकाव्यख्या हरदत्तस्य ) ---

कर्मशब्देनेह काम्यकर्माणि विवक्षितानि । न नित्यनैमित्तिकानि ,तानि हि मुमुक्षोरपि कर्तव्यानि । यथाहुः --
मोक्षार्थी न प्रवर्तेत  ततः काम्यनिषिद्धयोः ।
नित्यनैमित्तिके कुर्यात् प्रत्यवायनिवृत्तये ॥
तानि कर्माण्यपवदितुं शीलमस्य स कर्मापवादी । परमहंसास्तु कर्ममात्रम् अपवदन्ति  - ' मा कुरुत ' इति । न कर्तव्यानीत्यर्थः ।
मया बहूनि धर्मशास्त्राणि दृष्टानि । न क्वचिदयं  हरदत्तोद्धृतः श्लोकः दृष्त्टः ।
किञ्चिदत्र विचार्यते ---
निर्णयसिन्धौ - तृतीयपरिच्छेदः - यतिसंस्कारनिर्णयः ---
स च संन्यासः चतुर्धा इत्याह हारीतः --
कुटीचको बहूदकः हंसश्चैव तृतीयकः ।
चतुर्थः परमो हंसः यो यः पश्चात् स उत्तमः ॥
आर्यः पुत्रादिना कुटीं कारयित्वा तत्र गृहे वा वसन् काषायवासाः - शिखोपवीतीत्रिदण्डवान् बन्धुषु स्वगृहे वा भुञ्जानः आत्मज्ञो भवेत् -एतदत्यन्ताशक्तपरम् ।
द्वितीयस्तु बन्धून् हित्वा सप्तागाराणि भैक्षं चरन् पूर्वोक्तवेषस्स्यात् ।
हंसस्तु पूर्वोक्तवेषस्तु एकदण्डः । एकं तु वैणवं दण्डं धारयेत् नित्यमादरात् इति स्कान्दात्
स्कान्दे --
परहंसस्त्रिदण्डं च रज्जुं गोबालनिर्मितां ।
शिखायज्ञोपवीतं च नित्यं कर्म  परित्यजेत् ॥
अयमप्येकदण्ड एव - ये तु शिखायज्ञोपवीतादित्यागनिषेधाः ते कुटीचकादिपराः ।
तस्मात् परमहंसस्य एकदण्ड एव - सो'प्यविदुषः - विदुषस्तु सो'पि नास्ति --
न दण्डं न शिखां नाच्छादनं चरति परमहंस इति महोपनिषदुक्तेः - ज्ञानमेवास्य दण्ड इति वाक्यशेषाच्च ।

अत्रिः --
भिक्षाटनं जपं स्नानं ध्यानं शौचं सुरार्चनम् ।
कर्तव्यानि षडेतानि सर्वथा नृपदण्डवत् ॥
एतद्वेदार्थभिन्नपरम्- अत्रिः –
स्नानं सुरार्चनं ध्यानं प्राणायामो बलिस्तुतिः ।
भिक्षाटनं जपस्संध्या त्यागः कर्मफलस्य च ॥
एते यतिधर्मा इत्यर्थः - अन्ये'पि माधवमिताक्षरादौ ज्ञेयाः ।
यतिधर्मसमुच्चये --
न स्नानमाचरेत् भिक्षुः पुत्रादिनिधने श्रुते ।
पितृमातृक्षयं श्रुत्वा स्नात्वा शुद्ध्यति साम्बरः ॥
अयं चात्र विशेषः ---
पूर्वमीमांसकैः एतदभ्युपगम्यते यत् --
नित्यनैमित्तिकानाम् अकरणे प्रत्यवायः , करणे तु न किञ्चित्फलम् इति ।
अयं सिद्धान्तः शंकरभगवत्पादैः तत्र तत्र व्याख्यातम् --
सूत्रभाष्यम् **( 4-3-14) -** कार्याधिकरणम् --
यत्तु कैश्चित् जल्प्यते - नित्यानि नैमित्तिकानि कर्माण्यनुष्ठीयन्ते प्रत्यवायापनुत्तये । काम्यानि प्रतिषिद्धानि च परिह्रियन्ते स्वर्गनरकानावाप्तये .... इति तदसत् । प्रमाणाभावात् ।
न हि एतच्छास्त्रेण केनचित् प्रतिपादितं मोक्षार्थी इत्थं समाचरेदिति !
भगवद्गीता **-- 4-18** (कर्मण्यकर्म यः पश्येत्.. ) --
नापि नित्यानाम् अकरणात् अभावात् प्रत्यवायभावोत्पत्तिः , ' नासतो विद्यते भावः ' इति वचनात् ' कथम् असतः सज्जायेत ' इति च दर्शितम् असतःसज्जन्मप्रतिषेधात् ।
तस्मात् परमहंसभूतस्य शंकराचार्यस्य नित्यनैमित्तिकानां करणे न तात्पर्यम् । किन्तु मातरि मृतायां यदि किञ्चित्कर्म कृतं चेत् ---
तेषां तेजोविशेषेण प्रत्यवायो न विद्यते ।
तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरको जनः ॥

तस्य कर्मणः फलं नास्ति । कर्म च तत् न शास्त्रविहितम्।
*****************************************************************

## नाट्यस्य मूलम् --

यस्यां गायन्ति नृत्यन्ति भूम्यां मर्त्या व्यैलभाः ।

युध्यन्ते यस्यामाक्रन्दो यस्यां वदति दुन्दुभिः ।

सा नो भूमिःप्रणुदतां सपत्नानसपत्नं मा पृथिवी कृणोतु । --- अथर्ववेदसंहिता , **12-1-41**
वाक्यार्थाभिनयः नाट्यम् ।पदार्थाभिनयः नृत्यम् ।गात्रविक्षेपमात्रं नृत्तम् । (सिद्धान्तकौमुदी – भ्वादिः – णट नृत्तौ ) ।
********************************************************************

## एकैकस्य शब्दस्य अनेकार्थत्वम्----

प्रत्यर्थं शब्दनिवेशः -- says Katyayana / Patanjali under सरूपाणाम् एकशेष एकविभक्तौ ( पा 1-2-64)
Some scholars held that a single शब्द would denote many अर्थs through तन्त्रम् -- just like a single lamp is used by many for reading .
Others argued that सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति - so through आवृत्ति the same शब्द is to be pronounced for each अर्थ ।
Patanjali under भूवादयो धातवः (1-3-1 ) says –
बहवो हि शब्दा एकार्था भवन्ति । तद्यथा – इन्द्रः शक्रः पुरुहूतः पुरंदरः । कन्दुः कोष्ठः कुसूल इति ।
एकश्च शब्दो बह्वर्थः । तद्यथा – अक्षाः पादाः माषाः इति ।
तन्त्रम् , आवृत्ति etc are borrowed from पूर्वमीमांसा ।
While going to discuss the गौणमुख्यविभाग of अर्थs , Hari in वाक्यकाण्ड **of** वाक्यपदीयम् discusses as to whether there is शब्दभेद due to अर्थभेद ---
एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः ।

निमित्तभेदात् एकस्य सार्वार्थ्यं तस्य भिद्यते ॥ 250
In व्याकरणम् there are two पक्षs -- एकशब्ददर्शनम् and अनेकशब्ददर्शनम् ।
अर्थभेदेन शब्दभेदः -- the गोशब्द in the sense of धेनु (cow) is different whereas the गोशब्द in the sense of भूमि is different --- this is अनेकशब्ददर्शनम्।
Although many meanings such as धेनुः ,भूमिः , किरणम् etc are denoted there will be a single गोशब्द only -- this is एकशब्ददर्शनम् ।
The latter argue - although the पदरूपनिमित्तम् is only one , following अर्थः , प्रकरणम् etc निमित्तs , which are different , a single गोशब्द would be अनेकार्थवाचक ।
यौगपद्यमतिक्रम्य पर्याये व्यवतिष्ठते ।
अर्थप्रकरणाभ्यां वा योगात् शब्दान्तरेण वा ॥ 251
Although there are many meanings for गोशब्द , crossing the simultaneity , due to purpose ( अर्थ ) or context or due to connection with another शब्द , a शब्द would denote the meanings by turn (पर्याय means to be used by turn , but not together - you should not say - स्वर्गनाककामो यजेत - but either स्वर्गकमो यजेत or नाककामो यजेत) ।
गौर्दुह्यते - is understood due to proximity of another शब्द ।
गां पाठय ( teach the गौः ) - tells आचार्य to a senior student -- it means ' teach this मन्दबुद्धि ( from वाहीकदेश / बाह्लिकदेश = Punjab ?) who is as good as a bull ' .
Here गौः means not a bull but a वाहीक ( compared with a bull due to inertia ) .
गौः means a bull - this is मुख्यार्थ । गौः means वाहीक - this is गौणार्थ ।
The same idea is explained --

यथा सास्नादिमान् पिण्डो गोशब्देनाभिधीयते ।
तथा स एव गोशब्दो वाहीके'पि व्यवस्थितः ॥ **252,** वाक्यकाण्डः **,**
वाक्यपदीयम्
In both the cases above it is अभिधावृत्ति only . If the अर्थ is popular then it is मुख्यार्थ and if the अर्थ is not so popular then it is called गौणार्थ ( मीमांसकाः accept गौणीवृत्ति , which is सादृश्यमूलक , separately from लक्षणावृत्ति । Whereas वैयाकरणाः accept लक्षणा only ) .
The same is clearly stated --
सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः ।
प्रसिद्धिभेदात् गौणत्वं मुख्यत्वं चोपवर्ण्यते ॥ 253 , ibid
A single मन्त्र , due to different शक्तिs , denotes different meanings in different contexts --
During आत्मविचार it will be in the sense of आत्मा , during जप in देवतारूपार्थ and during याग in क्रत्वर्थ ।
Take गायत्रीमन्त्र ( गायन्तं त्रायते इति गायत्री - त्रैङ् पालने) --
during ध्यानम् as प्रत्यगात्मा, during जप ' सूर्यदेवताध्यानपर' ,
during कर्मानुष्ठानम् ' सूर्यमण्डलपर' ---
एको मन्त्रः तथाध्यात्मम् अधिदैवम् अधिक्रतु ।
असङ्करेण सर्वर्थो भिन्नशक्तिर्व्यवस्थितः ॥ 254 ,ibid
A शब्द would have नित्यसंबन्ध with an अर्थ - if you say that among several meanings a श्ब्द would have सम्बन्ध with a single meaning then there will be अनित्यत्वम् of शब्दार्थसंबन्ध ?
----
गोत्वानुषङ्गो वाहीके निमित्तात् कैश्चिदिष्यते ।
अर्थमात्रं विपर्यस्तं शब्दः स्वार्थे व्यवस्थितः॥ 255, ibid
अर्थ undergoes change but the शब्द is in स्वार्थ only - due to निमित्तभेद there will be गोत्वसंबन्ध to वाहीक - some scholars argue --

the meaning of a शब्द is of two types -- स्वरूपम् and बाह्यम् ।
The स्वरूपम् ' गौः ' is the meaning of गोशब्द ।
गोशब्द , always denotes the meaning ' गोत्वम् ' । Since this is outside the
गोशब्दस्वरूप it is called बाह्यार्थ ।
Such a बाह्यार्थ ,i e गोत्वम् , shines in a गौः and being superimposed in वाहीक etc .
That means although the गोशब्द denoted the natural अर्थ ,i e गोत्वम् , due to the existence of some गुणs of a गौः (bull) in वाहीक , such as बुद्धिजाड्यम् , it is used to denote वाहीक also.
बह्यार्थोपचार is shown above . Now स्वरूपोपचार --
तथा स्वरूपं शब्दानां सर्वार्थेष्वनुषज्यते ।
अर्थमात्रं विपर्यस्तं स्वरूपे तु स्थितिः स्थिरा ॥ 256, ibid
Thus the शब्दस्वरूप is connected in all अर्थs . The अर्थ only has changed (विपर्यस्तम्) but the स्वरूपम् is stable / immutable .
The above theory in अनेकशब्ददर्शनम् --
एकत्वं तु सरूपत्वात् शब्दयोः गौणमुख्यायोः ।
प्राहुरत्यन्तभेदे'पि भेदमार्गानुयायिनः ॥257, ibid
Although the गौणार्थकशब्द and मुख्यार्थकशब्द are different , following the स्वरूपम् they are अभिन्न ( non-different ) .
Earlier , Hari employed the word - आहुः ( एकमाहुरनेकार्थम् ) - now he used the word - प्राहुः -- so Hari is tilting towards आनेकशब्ददर्शनम् ।
So for वैयकरणs -- गौणर्थकशब्द is different and मुख्यार्थकशब्द is different .
हरिशब्दस्य चतुर्दश अधिका वा अर्थाः सन्ति , एवमेव भवदुक्तस्य अवधातोः अपि --
उक्तम् किल -- अर्थात् प्रकरणाद्वा (महाभाष्यम् **, '** एकः पूर्वपरयोः ' पा **8-1-81**) (अर्थः = प्रयोजनम्) अर्थनिर्णयः ।

सह नौ अवतु --- नौ = आचार्यान्तेवासिनौ , सह , अवतु = रक्षतु । ( तैत्तिरीयोपनिषत् )।
प्रसिद्धश्च अर्थः प्रथमं स्वीक्रियते ।
यत्र सन्देहः तत्र -- 'व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहादलक्षणम्' (परिभाषा ) ।
' अर्थात् प्रकरणाद्वा ' इति महाभाष्यस्य विवरणमेव ---
संयोगो विप्रयोगश्च .....
शब्दार्थस्य अनवच्छेदे विशेषस्मृतिहेतवः । ( अनवच्छेदे = अनिश्चये ) – 315,316, वाक्यकाण्डः , वाक्यपदीयम् । **(these deciding factors of meaning are quoted in all major** अलङ्कारग्रन्थ**s ) .**
तन्त्रयुक्तयः -अर्थशास्त्रे , चरके सुश्रुते च । **(illustrated in my book – Theories of Language : Oriental and Occidental (available online archive.com ) .**
धातूनाम् अर्थाः पाणिनिना नोक्ताः किन्तु भीमसेनादिभिः इति ऐतिह्यम् । ( कैयटः , नागेशश्च – भूवादयो धातवः पा **1-3-1** ) |
*****************************************************

## योगः---

अथ योगानुससनम् - is the first सूत्रम्

योग is of two types -- संप्रज्ञात and असंप्रज्ञात ।
योगः चित्तवृत्तिनिरोधः ( योगसूत्रम् 1-2) --
योग means ' arresting the behaviour of mind ' --
Mind, by nature , is fickle -- चञ्चलं हि मनः पार्थ ! (भगवद्गीता ) ।
Here the term योग is from the root -- युज = समाधौ (and not युजिर् योगे) |
Now Vyasa says - since the qualifier ' सर्व 'is not prefixed , the definition is applicable to both - संप्रज्ञात and असंप्रज्ञात --
What he means is this --
had Patanjali ruled --योगः सर्वचितवृत्तिनिरोधः then it would have been applicable to असंप्रज्ञातयोग only .

In संप्रज्ञातयोग there will not be सर्वचित्तवृत्तिनिरोध  but in the other it will be .
Here समाधि means वृत्तिनिरोध only  and it is अङ्गी ।
There is a समाधि which is अङ्ग --
यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो’ष्टावङ्गानि 2-29
Vyasa also explains that मनस् has got three गुणs -
प्रख्याशीलत्वात् सत्त्वगुणम् ( प्रख्या = ज्ञानम् ) , प्रवृत्तिशीलत्वात् रजोगुणम् and स्थितिशीलत्वात् तमोगुणम् (मनस्) ।
In other words - although it is one , it is built with three गुणs and due to the three गुणs , which are hostile to each other , it would have विचित्रपरिणाम ।
A चित्तम् with वैराग्यम्  would arrest all kinds of ख्याति and thus the चित्तम् will be निर्बीज and it is समाधि  and the same is called असंप्रज्ञातयोग by योगिन्s.
Vacaspati explained Vyasa's भाष्यम् ।
It may be suggested that such texts may be studied under a गुरु rather than following translations . Face to face interaction is essential.
योजनम्    योगः - भावे ( 3-3-18) घञ् , युज = समाधौ ( दिवादिः)
Here समाधि means चित्तवृत्तिनिरोधः - arresting  the behavior of mind .
There is समाधि , that is one of the eight constituents -
अष्टाङ्गानि - यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः (just like Ayurveda).
योग is of two types - संप्रज्ञातः and असंप्रज्ञातः ।
The above derivation is following तत्त्ववैशारदी of वाचस्पतिमिश्र and वृत्ति of नागेश ।

According to Panini, it can be from युजिर् योगे ( रुधादिः) or श्य युज समाधौ ।
योगः शीलम् / धर्मः अस्य , योगस्य साधुकारी इत्यर्थेषु - युजिर् / युज + घिनुण् (both the meanings are to be taken as per commentaries) ---
संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुह-
दुषद्विषदुहद्रुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषभ्याहनश्च (3-2-142) |
युज्यते योगं ब्रह्मचारी - ’ कर्मवत् कर्मणा तुल्यक्रियः ’ (3-1-87) ।
श्यन् replacing यक् ।
*******************************************************************

## अहल्याशब्दार्थः—

Where is this --

तैत्तिरीयारण्यकम् - 2 ( अरुणप्रपाठकः) - 59
What is this --
हल विलेखने ( विलेखनं कर्षणम्) - हलति
हलस्य कर्षः हल्यः - कर्षः कर्षणं कृष्यमाणं वा -- ’ मतजलकर्षात् करणजल्पकर्षेषु ’ पा 4-4-97 इति प्राग्घितीयः यत्प्रत्ययः तद्धितः ।
हल्या भूमिः - कृषियोग्या इत्यर्थः - an arable land -- ' स्त्रियाम् ’ ’अजाद्यतष्टाप् ’ - पा 4-1-3, 4-1-4 इति अदन्तलक्षणः टाप् - ’ अनुदात्तौसुप्पितौ ’ पा 3-1-4 .
न हल्या - अहल्या - a barren land
जरयतीति जारः --
जॄष् वयोहानौ - जीर्यति ।
‘दारजारौ कर्तरि णिलुक्च ’ -- वार्तिकम् ( कौमुदी - परिमाणाख्यायां सर्वेभ्यः 3-3-20) - घञ् कर्तरि-जारः ।
This is a prayer to Indra for rains - so that the barren land can be ploughed up and crops can be grown .

हलेन जरयितुम् अशक्या अहल्या - तस्याः जरिता / जरीता ( ' वृतो वा ' पा 7-2-38)
अहल्यायै इति विभक्तिव्यत्ययः छान्दसत्वात् - ’ व्यत्ययो बहुलम् ’ पा 3-1-85 .
In another उपाख्यानम् it is stated that Indra is responsible for rains.
*****************************************************

## अहङ्कारः - अस्मिता---

अहङ्कार and अस्मिता are not the same - they are different .
Here is नागेशवृत्ति (1-17) --
अत्र अहं सुखी इति आनन्दगोचरैव वृत्तिः । यत्तु आनन्दशब्देन तद्वानिन्द्रियवर्ग इति तन्न । ततः
सूक्ष्मतन्मात्रादियोगोत्तरं पुनः स्थूलारोहस्य अनौचित्यात् ।
एवम्अग्रे अस्मितापदस्य अहंकारपरतया व्याख्यानमपि चिन्त्यम् ।
अस्मिता तु केवलपुरुषविषया संवित्साक्षात्कारः
अस्मीत्येतावन्मात्राकारा देहादिभिन्नःअस्मीत्येतावन्मात्राकारा वा ।
अस्य जीवात्मपरमात्मविषयत्वेन द्वैविध्यं वक्ष्यते ।
विविक्तचेतनाकारस्यैव अस्मिताशब्देन उपलक्षणात् तदनुगतः सास्मितः इति ।
It may also be noted that the term इव in 2-6 -- दृक्दर्शनशक्त्योः एकात्मता इव अस्मिता -- means it is just like that but not in reality .
मुखं चन्द्र इव न तु मुखं चन्द्र एव ।
पुरुषः अपरिणामी प्रकृतिस्तु परिणामिनी इति तु सार्वजनीनमेव ।
Sayana in सर्वदर्शनसंग्रह followed तत्त्ववैशारदी and भोजवृत्ति - did not discuss this aspect .
A Telugu translation by an unknown author also followed वाचस्पति ।

The fact is that , just like in महाभाष्यम् , in व्यासभाष्यम् also there are आचार्यदेशीयाः and in some aspects there are differences of opinion among the commentators.
**********************************************************************

## शास्त्रम् – रुद्रहृदयोपनिषत् ---

" रुद्रो वेद: उमा शास्त्रम् ,तस्मै तस्यै नमो नम:।"
अर्धो वा एष आत्मनो यत्पत्नीः - इतिश्रुतिः **( तैत्तिरीयसंहिता 6-1-8-5 – कृष्णयजुर्वेदः ) ।**
अर्धो वा एष आत्मनो यज्जाया **(शतपथब्राह्मणम् , 5-2-1-10 , 8-7-2-3 – शुक्लयजुर्वेदः ) ।**
शास्त्रम् = वेदाङ्गानि ( जातौ एकवचनम्) ।
अङ्गी वेदः अङ्गानि शास्त्रम् -- अङ्गाङ्गिभावः ।
दम्पत्योः सहाधिकारात् – इति षाष्ठमीमांसा अत्र अनुसन्धेया ।
पाणिग्रहणात् सहत्वं कर्मसु पुण्यफलेष च - इति आपस्तम्बगृह्यसूत्रं च ।
अङ्गिभूतवेदरूपः रुद्रः अङ्गभूतशास्त्ररूपिणी उमा , तादृशाय तस्मै रुद्राय , तादृश्यै उमायै च नमः ।
***********************************************************

## भारतस्य चरित्रम् --

The British (we are not touching others) have entered Indian subcontinent thru East India Company for trade and commerce. Then there were many small kingdoms and already the political arena was too disturbed with Hindu and Muslim kings fighting every now and then. Taking advantage of the situation the British slowly entered into other fields also while the trade was flourishing.
Some of them started learning Sanskrit. Once the Western Education System (WES) was in place the deterioration of Traditional Education started.

In fact, it is not only the field of Education, but Finance, Medical System, Polity, Defence (then War Dept) etc are also affected by WES .
People started tilting towards English as it was easy to learn compared to Sanskrit. They also started compiling dictionaries with regard to Sanskrit and vernaculars.
During the course of time there emerged a group of people who have deviated from the original path of Education associated with Philosophy / Spirituality and started to take things as merely mundane .
Such a shift in education had had a very hard impact on Indian Education System and consequently on the minds of the indigenous people and their behaviour . The way of thinking had completely changed. Instead of memorizing अमरकोश and getting trained in the essential trio of पदवाक्यप्रमाणशास्त्रs ( व्याकरणम् , मीमांसा , न्यायवैशेषिके) scholars were attracted towards the English Dictionaries.
So the backbone of आर्यसंस्कृति , i e धर्म , is dissociated from Education as well as day to day life and today we face people of even Indian origin arguing against the established tenets. Today , it is almost impossible to find a scholar who is trained on traditional lines and can interpret the वेदs , इतिहासs etc.
Also the present day students are not interested in learning .
It is the धर्म of कलियुग !

गृहे गृहे पुस्तकभाण्डभाण्डम्
पुरे पुरे पण्डितयूथयूथम् ।
मठे मठे तापसबृन्दबृन्दम्
न ब्रह्मवेत्ता न च कर्मकर्ता ॥

*****************************************************************

कुबेरशब्दव्युत्पत्तिः ---
कृष्णयजुर्वेदे तैत्तिरीयारण्यकम् **( the origin of** कल्पशास्त्रम्**) -**
अरुणप्रपाठकः --
कल्पो’त ऊर्ध्वम् । यदि बलिगं हरेत् । हिरण्यनाभये वितुदये
कौबेरायायं बलिः । 123
नमो वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यम् । कामेश्वरो
वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः । 127
कुत्सितं बेरं शरीरम् अस्य कुबेरः - he has got कुष्ठरोग --

कुत्सायां क्वितिशब्दो’यं शरीरं बेरमुच्यते ।
कुबेरः कुशरीरत्वात्  नाम्ना तेनैव सो’ङ्कितः॥वायुपुराणम्
कुबि  छादने / आच्छादने (भ्वादिः - कुम्बति - not कुवति ) -
कुम्बेर्नलोपश्च (उणादि 1-59) इति एरक् - कुम्बति धनम् इति कुबेरः ।
शब्दशक्तिमूलध्वनिः --कुमारसम्भवम् **(3-25)** - वसन्तः जजृम्भे -
उत्तरायणे प्रवृत्तः सूर्यः --
कुबेरगुप्तां दिशमुष्णरश्मौ गन्तुं प्रवृत्ते समयं विलङ्घ्य ।
दिग्दक्षिणा गन्धवहं मुखेन व्यलीकनिःश्वासमिवोत्ससर्ज ॥
प्रवृत्तः इति आदिकर्मणि क्तः कर्तरि ।
कुबेरः उत्तरदिशः अधिपतिः - ’ ...... कुबेर ईशः पतयः पूर्वादीनां दिशां
क्रमात् ’ -अमरः।
श्लेषः - कुबेरेण पालिता /  कुत्सितशरीरवता नायकेन रक्षिता ।
व्यलीकम्= दुःखम् ।
उत्प्रेक्षा - ’ इवशब्दो’पि तादृशः ’ -दण्डी।
शिशुपालवधे **(3-1) -** सूर्यः दक्षिणायनं प्रस्थितः ---
कौबेरदिग्भागमपास्य मार्गम् आगस्त्यमुष्णांशुरिवावतीर्णः ।
अपेतयुद्धाभिनिवेशसौम्यो हरिर्हरिप्रस्थमथ प्रतस्थे ॥
कौबेर्या दिशः भागम् = उत्तरायणम् । ’ स्त्रियाः पुंवत् ’ पा -
इतिपुंवद्भावः ।

उत्तरायणम् and दक्षिणायनम् are discussed in वेदान्तदर्शनम् **and** कल्पशास्त्रम् गृह्यसूत्रम् - उपनयनादिः**)** ।
वैश्रवणः --
Panini lists two words - विश्रवणः and रवणः as आदेशनिपातौ and अण् प्रत्यय in शिवादिगण - शिवादिभ्यो’ण् ( 4-1-112) ---
पदमञ्जरी --
रवणविश्रवणशब्दौ पठ्येते , तौ विश्रवःशब्दस्यादेशौ प्रकृत्यन्तरे वा वृत्तिविषये , तत्समानार्थे, विश्रवसो’पत्यं वैश्रवणो रावणः ।
वैश्रवणः = कुबेरः also .
पौलस्त्यः = कुबेरः also - पुलस्तेः गोत्रापत्यं पौलस्त्यः - ’ गर्गादिभ्यो यञ् ’ ( पा 4-1-105) .
धनदः , धनाधिपः -- कुबेरः ।
******************************************************************

## शास्त्रेषु क्रीडाः क्रीडनकानि च --

न्यायदर्शनम् - ज्योतिषम् - व्याकरणम्
1.न्यायदर्शनम् --
जात्याकृतिव्यक्तयस्तु पदार्थः ( न्या सू 2-2-67 ) , आकृतिः जातिलिङ्गाख्या ( 2-2-68)
जातिः लिङ्ग्यते ज्ञायते अनेन इति जातिलिङ्गम् ।
पिष्टकमयी गौः - is the example ( प्रसन्नपदाव्याख्या) ।
So when you produce a doll with rice-powder ( पिष्टम्) , clay (मृत्) , silver (रजतम् ), gold (सुवर्णम्) , wood , plastic etc you may call it by the same name ( check with Panini down the line) .
2. ज्योतिषम्--
मिहिराचार्य predicted that the king's son (बालारिष्टम्) was going to die due to a pig . The king retorted - how can a pig enter the अन्तःपुरम् ?

One day the child , while playing with a wooden pig , was accidentally killed.
The king called the ज्यौतिषिक - - - ' वराहमिहिर ' - the author of बृहज्जातकम् etc.
So a wooden pig can be named a - वराह (check with Panini down)
3.व्याकरणम्--
Panini had earmarked a number of सूत्रs ( in 5/ 3 &4 तद्धितs) for naming toys etc --
( under the second शिवसूत्रम् , Patanjali discusses the categorization of शब्दs - threefold or fourfold ( त्रयी / चतुष्टयी शब्दानां प्रवृत्तिः - the behaviour of शब्दs - जाति-गुण - क्रिया - संज्ञाः ) -
any संज्ञा should conform to the system of व्याकरणम् - so कूची - मञ्ची (कूचिमञ्चि in Andhradesa - surname of ब्राह्मणs) etc coined in देशभाषा is not acceptable - is the सिद्धान्त) |
1. इवे प्रतिकृतौ( 5-3-96) कन् स्वार्थे
प्रतिकृतिः = प्रतिरूपकम् = प्रतिच्छन्दकम् = copy made of wood , clay, gold, plastic etc
अश्व इव अयम् - अश्वकः - the toy which is like an अश्व ।
स्वार्थ means thee is no any additional meaning than that of प्रकृति ।
2. संज्ञायां च 5-3-97 कन् स्वार्थे
If it is not a copy but a संज्ञा (name) then - अश्वकः is the name of a thing that is just like an अश्व ।
3. लुम्मनुष्ये5-3-98 कनः लुप्
If the above (संज्ञायाम्) refers to a human being then the प्रत्यय gets लुप् (लोपः)।

चञ्चा means a person made of grass/hay (effigy) - a person who is like a चञ्चा is चञ्चा ।
वर्ध्रिका is a person or thing made of leather (चर्मन्) - a person like वर्ध्रिका is वर्ध्रिका ।

4. जीविकार्थे चापण्ये (5-3-99) कनः लुप्
If the प्रतिकृति / photo is for livelihood ( taking the photo from house to house for alms) but not to sell then also there will be लुप् for कन् - शिवः , वासुदेवः , स्कन्दः ।If it is for sale then हस्तिकाः , अश्वकाः , रथकाः etc .
5. देवपथादिभ्यश्च 5-3-100 कनो लुप्
The कन् by इवे प्रतिकृतौ and संज्ञायां च , get लुप् - देवपथः , हंसपथः ।
देवानां पन्थाः , हंसानां पन्थाः ।
**अर्चासु ( अर्चा= प्रतिमा / idol) -- शिवः , विष्णुः , गणपतिः (पूजनार्था)**
**चित्रकर्मसु -- रावणः , कुंभकर्णः , इन्द्रजित् ध्वजेषु -- कपिः , गरुडः , वृषभः**
आदिशब्दः प्रकारे , तेन आकृतिगणोऽयम् ।
6. स्थूलादिभ्यः प्रकारवचने कन् **(5-4-3) --**
प्रकारः = भेदः , सादृश्यं च ।
कन्प्रकरणे चञ्चत्बृहतोः उपसंख्यानम् **(वा)**
चञ्चत्को मणिः - here the मणि (or anything the like) is not actually moving but due to the inherent light it looks to be moving - hallucination .Similarly , the मणि / thing is not huge but looks to be one due to the emitting light is बृहत्कः ।
Looks like -- big - स्थूलकः ; too small - अणुकः ; माष - माषकः ; इषु - इषुकः।
7. देवात्तल् **(5-4-27) --** स्वार्थे तल्
देव एव देवता ।

8. अवेः कः **(5-4-28)** स्वार्थे कः
अविरेव अविकः ।
कनि आद्युदात्तः **,** के तु अन्तोदात्तः ।
9.यावादिभ्यः कन् **( 5-4-29)** स्वार्थे
याव एव यावकः ।
गणसूत्राणि **--**
ऋतौ उष्णशीते -- उष्णकः ऋतुः , शीतक ऋतुः
अणु निपुणे -- अणुकः सूक्ष्मदृक्
पुत्र कृत्रिमे -- पुत्रकः any toy made of metal / clay / wood / plastic
(शिलापुत्रकस्य शरीरम् - भेदविवक्षा )
शून्य रिक्ते -- शून्यकः - any pot or so which is empty
तनु सूत्रे -- तनुकम् सूक्ष्मतन्तुः
कुमारीक्रीडनकानि च **-- कन्दुकम् ( ball - रघुवंशः - 16 सर्गः)**
सुधाव्याख्या **on** अमरकोश **(**मनुष्यवर्गः **-138) says -**
गेन्दुकः कन्दुकः -- कन्द्यते , कदि आह्वाने रोदने च (भ्वादिः) --
स्वार्थे कन् ( ज्ञापितः 5-4-5)
But it is not correct -- the author भानुजिदीक्षित is referring to ’न सामिवचने ’ , but it is due to यावादिभ्यः कन् , and the गणसूत्रम् - कुमारीक्रीडनकानि च ।
क्रीडनकम् = क्रीडासाधनम् ।
If you want कन् in स्वार्थ it is by न सामिवचने । Nagesa prefers यावादिभ्यः कन् ।
Many support न सामिवचने । This is right.
*****************************************************

## मन्त्राः – वैदिकाः अवैदिकाश्च--

Please do ' read between the lines '.
बीजमन्त्रs do not have any meaning - then what to think ?
Let us discuss the matter threadbare --
What is the problem ?

There are thousands of मन्त्रs across the four Vedas .पूर्वमीमांसा is the system that deals with the definition etc of Vedic sentences .
The Vedic exegeses of मीमांसा ( the word पूर्व refers to the earlier parts of Veda, which propose कर्म) are the top authority in deciding the scope , range and semantics of any given stretch of language , both in वेद and लोक ।
वेदमन्त्रs are अपौरुषेय and have been there since time immemorial - अनादि ।
Some centuries ago some scholars floated a system called तन्त्रम् ( having many dimensions) and compiled कल्पसूत्रम् that helps in the procedure of invented rites , which are अवैदिक ।
In order to achieve authority for such cults scholars, who are well versed in वेदाः ,वेदाङ्गानि , दर्शनानि , पुराणानि etc started writing commentaries on the texts of तन्त्रम् ।
Often these commentaries go awry and one can see abuse of Indian Philosophical Systems, including Veda itself.
Since people prefer easy ways of achieving things and do not want to be bounden by restrictions at all levels these cults attracted many common as well as educated people.
During different intervals these works on तन्त्र were refuted but total eradication was not possible.
Even Nagesa , in लघुमञ्जूषा, due to the influence of तन्त्रम् , says - सृष्टि starts from बिन्दु - Samkaracarya solved the question of विगानम् in सूत्रभाष्यम् ।
प्रत्यभिज्ञादर्शनम् ( लोचनकर्ता is a propagator) holds - since Panini ruled - स्वतन्त्रःकर्ता , शिव creates the creatures irrespective of their कर्म !

The founders and propagators of तन्त्रम् had invented some entities called बीजमन्त्रs. We do not know what it means and what the समास is.
They are not bothered about the impending पाणिनिविरोध or जैमिनिविरोध ।
Let us take up the question of - whether these बीजमन्त्रs fall under the definition of **Jaimini / Kumarila --**
**पूर्वमीमांसादर्शनम् - मन्त्रलक्षणाधिकरणम्  (शाबरभाष्यम्, तन्त्रवार्तिकम्) --**
**तच्चोदकेषु मन्त्राख्या 1-1-7-32**
how to decide as to whether a sentence or text can be called a मन्त्र or not ?
-- if the sentence / text in question is popular among those who learnt Veda as मन्त्र  then that can be considered as a मन्त्र ।
We come across diversified मन्त्रs in वेद --
1. ending with असि - मेदो’सि etc
2.ending in त्वा - इषेत्वोर्जेत्वा
3.ending in आशीः - आयुर्दा असि
4. ending in स्तुत्यन्त - अग्निर्मूर्धा दिवः ककुत्
Also स्तुतिमन्त्र, प्रलापमन्त्र, प्रैषमन्त्र etc.

So it is difficult to offer a definition that covers all such मन्त्रs .
So following वैदिकसमाख्या -- " प्रयोगकाले अर्थस्मारकाः मन्त्राः  ", and their remarks such as - मन्त्रानधीमहे , मन्त्रानध्यापयामः , मन्त्रावर्तन्ते etc , it is decided that such and such a popularity is the definition of मन्त्रs.
It is simply impossible to take up all entities on earth and offer definitions - same is the case with मन्त्रs also --
ऋषयो’पि  हि लक्ष्याणां नान्तं यान्ति पृथक्त्वशः ।

लक्षणेन तु सिद्धानाम् अन्तं यान्ति विपश्चितः ॥ Kumarila , 2-1-7-32
Therefore , since we do not find any meaning assigned to बीजाक्षरs / बीजमन्त्रs , we cannot consider them as मन्त्रs at all .
' मन्त्रब्राह्मणयोः वेदनामधेयम् ' ( आपस्तंबपरि. सूत्रम्) - here the term ब्राह्मण includes आरण्यकम् and उपनिषत् ।
मन्त्र is for जप -तज्जपः तदर्थभावनम् **( योगसूत्रम् , 1-28 )** ।
ब्रह्मणभाग prescribes विधि ।
The complete Vedic literature is अपौरुषेय - there is no room for discussion .
बीजमन्त्रs are पौरुषेय and are not embedded in वैदिकमन्त्रs .
Through examples you will come to know their form .
They do not have any meaning .
Let us take up परशुरामकल्पसूत्रम् and discuss the matter --
(Gaekwad's Oriental Series , Volume XXII, परशुरामकल्पसूत्रम् , Part 1,रामेश्वरकृतवृत्तिसहितम् ,
Ed . A Mahadeva Sastri , Baroda Central Library,1923)
The book in question is authored by none other than परशुराम ।
The वृत्तिकार ,रामेश्वर is not an ordinary scholar - he mastered all दर्शनs , especially पूर्वमीमांसा ,and व्याकरणम् । In order to defend his interpretation , he quotes profusely from पू मी on every page .
The अवतारिका of the first सूत्रम् - अथातो दीक्षां व्याख्यास्यामः , says that - Parasurama , with a kind heart in the आधुनिकेषु मन्दमतिषु , श्रीशिवनिर्मितान्यसंख्यानि तन्त्राणि पर्यालोच्य ... तुरीयपुरुषर्थसाधनंलघुम् अध्वानं दर्शयन् प्रतिजानीते -
(तुरीयपुरुषार्थः = मोक्षः)
**So the purpose of तन्त्रम् is मोक्ष for non-intellectuals .**

At the outset Ramesvara quotes तन्त्रवार्तिकम् ,सूतसंहिता, अग्निपुराणम्**---**
तन्त्रदीक्षामनुप्राप्ताः  लोभोपहतचेतसा ।
त्यक्त्वा वैदिकमध्वानं तेन दह्यामहे वयम् ॥

पद्मपुराणम् -
ये च पाषण्डिनो लोके तान्त्रिका नास्तिकाश्च ये ।
तैर्दुष्प्रापमिदं तीर्थम् ...
etc that prohibited  तन्त्रम् and tries to defend by quoting from भागवतम् , महाभरतम् , अध्यात्मरामायणम् **etc . --**
यच्च श्रुतिपथगलितानामिति सूतगीतावचनं तत्रत्यं तन्त्रप्दं तन्त्रविशेषपरम् - तच्च तन्त्रं शैवागम इति प्रसिद्धम् , दक्षिणदेशे च भाषया जङ्गम इति प्रसिद्धैरनुष्ठितम् ।
Obviously ,Ramesvara  tried to strongly defend his cult by misinterpreting सूतसंहिता ।
What is highly exasperating is Ramesvara's - वेदस्य पौरुषेयत्वसमर्थनम् ।
'साक्षरा विपरीताश्चेत् राक्षसा एव केवलम् '
**Following** the Vedic sentences - अग्नीषोमीयं पशुमालभेत ,सुराग्रहा गृह्यन्ते - मपञ्चकम् is okay - argues Ramesvara .
He also sets aside तन्त्रप्रामाण्यखण्डनम् of Bhattojidikshita and takes the support of Samkaracarya , who authored प्रपञ्चसारतन्त्र **(?) .**
Some सूत्रs --
वर्णात्मका नित्याः शब्दाः 1-7
मन्त्राणां अचिन्त्यशक्तिता 1-8
सम्प्रदायविश्वासाभ्यां सर्वसिद्धिः 1-9
विश्वासभूयिष्ठं प्रामाण्यम् 1-10

अथो वाचंब्लूं झौमिति जूंस इति चोक्त्वा अमृते अमृतोद्भवे
अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्वाहेति चतुर्थो मन्त्रः 1-29
..... प्रणवःक्रों भ्रों क्रौं झौं छ्रौं ज्रौंस्वाहा इति भेरुण्डा ... 4-9
Similar material and discussion will be there in कुलार्णव ,रहस्यार्णव, देवीयामिळ , परमानन्दतन्त्र, गणेश्वरसंहिता , योगिनीतन्त्र , त्रिपुरार्णव , कामकलाविलास , कुमारितन्त्र , शिवरहस्य **etc .**
What about ओंकार / प्रणव before मन्त्रs ?
It is त्रितारी for them --
सर्वेषां मन्त्राणमादौ त्रितारीसंयोगः । त्रितारी वाङ्मायाकमलाः 3-8
Their प्राणायामis also different.
**************************************************

प्राणायामः **--**

>As far as I know and have been taught through inherited tradition, during प्राणायाम seven व्याहृतिs are used and the longer mantra is to be mentally repeated during कुंभक three times<

1. वसिष्ठस्मृतिः **(**अध्या **25-** श्लो **13) --**
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥
So you are taught the right way.
2. कात्यायनस्मृतिः **(11/ 6,7,8) --**
भूराद्याः तिस्र एवैताः महाव्याहृतयो’व्ययाः ।
महर्जनस्तपस्सत्यं गायत्री च शिरस्तथा ॥
आपोज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरतिशिरः।
प्रतिप्रतीकं प्रणवम् उच्चारयेदन्ते च शिरसः॥
एता एतां सहानेन तथैभिः दशभिः सह ।
त्रिर्जपेत् आयतप्राणः प्राणायामः स उच्यते ॥
3. याज्ञवल्क्यस्मृतिः **(1-23) -**

गायत्रीं शिरसा सार्धं जपेत् व्याहृतिपूर्विकाम् ।
प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः ॥
लघ्वाश्वलायनस्मृतिः **,** बौधायनस्मृतिः etc also .
Another instance - when the time for सन्ध्यावन्दनम् is lapsed ( it should be performed within 8 घटिकाः from सूर्योदय) - then one has to offer an additional अर्घ्यम् as प्रायश्चित्त and it will be as follows --
प्रातस्सन्ध्याकालातिक्रमणजनितदो षपरिहरणार्थम्
अर्घ्यप्रदानरूपप्रायश्चित्तं करिष्ये --
ओं भूर्भुवस्सुवः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । ओमापोज्योतीरसोऽमृतं ब्रह्मभूर्भुवस्सुवरोम् ।
Let us look at योगानुशासनम् **--**
योगसूत्रम् **2-49 --**
तस्मिन् सति श्वासप्रश्वासयोः गतिविच्छेदः प्राणायामः
(तस्मिन् = आसने सति ; ' स्थिरसुखमासनम् **'** यो सू**)**
नागेशवृत्तिः --तयोः गतिविच्छेदः प्राणायाम इत्यर्थः ।
स्वाभाविकश्वासप्रश्वासयोः अभावः इति यावत् । स च रेचकपूरककुंभकेषु सर्वेषु एव अनुगतः।

The time for the three stages is fixed in वसिष्ठसंहिता - says Nagesa --
षोडशमात्रावच्छिन्नः पूरकः। चतुष्षष्टिमात्रावच्छिन्नः कुम्भकः। द्वात्रिंशत्मात्रावच्छिन्नो रेचकः ।
There is मतभेद in this regard .
So far as the performance is concerned - in Andhradesa , as far as I observed, people are not meditating गायत्री during प्राणायाम ।
Many पुरोहितs say - ' hold the nose ..ओम् भूः ... ओगं सत्यम् ... leave the nose ' .

An angry पुरोहित does not say - ' leave the nose ' , and while noticing the यजमान , still holding the nose, shouts - ' leave that widow-nose ' (रूपकसमासः न तु षष्ठीस्मासः) - it is a true translation of Telugu - ' वेधवमुक्कु ’; वेधव = विधवा ।
Neither the यजमान , nor the पुरोहित , nor the common people are bothered about this great drill called प्राणायाम ।
You(=questioner) have rightly said - संकल्प is given predominance over प्राणायाम ।
We lost a lot of our useful tradition and still losing --
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः (रामायणम् **)**
पथः अनपेतम् - पथ्यम् -- यत् ’धर्मपथ्यर्थन्यायादनपेते **’** पा सू **4-4-92**
**********************************************************

काणादं पाणिनीयं च सर्वशास्त्रोपकारकम् **---**

Every शास्त्रम् is built on जाति - द्रव्य concept --
take पाणिनीयम् --
अ इ उ ण् -- here अ represents 18 अकारs - how ? following जाति ।
सामान्यम् and द्रव्यम् are enumerated by कणाद as पदार्थs .
काणादम् is उपलक्षणम् for न्याय --
जात्याकृतिव्यक्तयस्तु पदार्थः (न्या सू , 2-2-67)
Panini built his शास्त्रम् taking both जाति and व्यक्ति --
जात्याख्यायाम् एकस्मिन् बहुवचनम् अन्यतरस्याम् पा सू 1-2-58
सरूपाणाम् एकशेष एकविभक्तौ पा सू 1-2-64
द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः – तर्कसङ्ग्रहः ।
Panini takes द्रव्यलक्षणम् of कणाद - ’ गुणसमुदायो द्रव्यम् ’ - in ' विप्रतिशिद्धं च अनधिकरणवाचि ’ (2-4-13) -- here अधिकरणम्

means द्रव्यम् that is acceptable to कणाद ( elsewhere in Panini द्रव्यम् is different) .
Patanjali explains - शब्दः समवेतम् अर्थम् आह ( कुत्सिते पा सू 5-3-74 ) - so it is a नित्यसंबन्ध called समवाय ।
' विरामो'वसानम् ' पा 1-4-109 - here विराम is nothing but अभाव (see भाष्यम्) ।
शब्दप्रमाणका वयम् - declares Patanjali (समर्थः पदविधिः, 2-1-1) -- प्रमाणs are chiefly discussed in न्याय and वैशेषिक -- especially आनुमान , upon which पाणिनीयम् stands.
In मीमांसा --
जातिः पदार्थः ( आकृत्यधिकरणम् - ' अकृतिस्तु क्रियार्थत्वात् ' जै सू 1-3-9-33 ) - द्रव्यम् आनुषङ्गिकम् ।
Mammatacarya - says - सङ्केतितः चतुर्भेदः जत्यादिर्जातिरेव वा ।
In आयुर्वेद - चरकसंहिता etc we come across discussions related to न्याय and वैशेषिक --
प्रमाणानि , कथा ( वाद-जल्प-वितण्डाः) , द्रव्यम् , गुणाः etc.
खण्डनखण्डखाद्यम् - श्रीहर्ष is a वैतण्डिक ।
धर्मशास्त्रs discuss जाति |
वेदान्त does not accept जाति - it is अनित्य for them - अग्नेः अग्नित्वम् अपागात् (छां ३)
बौद्धs argue - वृक्षः न वृक्षत्वावच्छिन्नः - सर्वं क्षणिकम् क्षणिकम् - so वृक्षः इतरवृक्षेभ्यो भिन्नः।
Examples can be offered from ज्योतिषम् etc also.
**************************************************

## वेदान्तः ---

In Indian tradition there are two things proposed by Veda - कर्म and ज्ञानम् ।

शंकराचार्य , in the उपोद्घात **of** ऐतरेयोपनिषत् , clarifies that in this work - ज्ञानम् after the performance of कर्म - is being preached --
परिसमाप्तं कर्म सहापरब्रह्मविषयविज्ञानेन । सैषा कर्मणो ज्ञानसहितस्य परा गतिः उक्थविज्ञानद्वारेण
उपसंहृता । .....
भवत्वेवं केवलमात्मज्ञानं मोक्षसाधनम् , न तु अत्र अकर्मी एव अधिक्रियते , विशेषाश्रवणात् । अकर्मिणः आश्रम्यन्तरस्य इह अश्रवणात् ।
कर्म च बृहतीसहस्रलक्षणं प्रस्तुत्य अनन्तरमेव आत्मज्ञानं प्रारभ्यते । तस्मात् कर्मी एव अधिक्रियते । न च कर्मासंबन्धि आत्मविज्ञानम् , पूर्ववत् अन्ते उपसंहारात् ।
..... इहापि ' को'यमात्मा ' इत्युपक्रम्य प्रज्ञात्मत्वमेव ' प्रज्ञानं ब्रह्म ' इति दर्शयिष्यति । तस्मात् न अकर्मसंबन्धि आत्मज्ञानम्।
By the above context (प्रकरणम्) we may decide the meaning of the sentence in question --
Samkaracarya is referring to the 1000 मन्त्राः in बृहतीछन्दस् that are used in स्तुतिकर्म ।
In ऐतरेयारण्यकम् **2-2-3-4** , there is विश्वामित्रोपाख्यनम् and we find reference to बृहतीसहस्रम्
here .
The same उपाख्यानम् is there in शाङ्खायनारण्यकम् (1-6) also .
बृहतीसहस्रं लक्षणम् **-** लक्ष्यते सूच्यते अनेन इति लक्षणम् **(**करणे बाहुलकात् ल्युट्**)** । तादृशं कर्म इत्यर्थः ।तत् कर्म प्रस्तुत्य **-** तस्य कर्मणः प्रस्तावं कृत्वा अनन्तरमेव आत्मज्ञानं प्रारभ्यते इति अन्वयः ।

Here in the उपोद्घात ,Samkaracarya is showing सङ्गति between कर्मभाग (मन्त्रभाग ) and ज्ञानभाग (ब्राह्मणभाग-उपनिषद्भाग ) of ऋग्वेद ।
What is the problem ?
We do not have a comprehensive and standard text of ऋग्वेद ।
शौनक and कात्यायन said that the number of सूक्तानि is 1017 .
While शौनक did not consider the 11 वालखिल्यसूक्तानि as a part of ऋग्वेद ,कात्यायन declared that the total number is 1028.
ऐतरेयारण्यक is divided into 5 आरण्यकs .
ऊपनिषत्s fall under आरण्यक and the latter falls in ब्राह्मणम् - ' मन्त्रब्राह्मणयोः वेदनामधेयम् ' ( आपस्तंबपरिभाषा ) ।
The महावाक्यं taken from ऋग्वेद ,i e ' प्रज्ञानं ब्रह्म ' - is here in this उपनिषत्।
याज्ञवल्क्य had had two wives - he used to show more affection towards the first one and call her by the name ' प्रिया ' , and the latter by the name ' इतरा ' ।
Son of इतरा - ऐतरेयः (स्त्रीभ्यो ढक् पा सू) -महिदासः - ऐतरेय़ेण प्रोक्तम् ।
******************************************************************

## ज्ञानम् --

Generally the word ' cognition ' is used for ज्ञानम् whereas 'knowledge ' is for विज्ञानम् ।
ज्ञानम् -----
As quoted in the earlier post and pointed out by Vidvan Hari Narayana Bhat
मोक्षे धीः ज्ञानम् - शिल्पशास्त्रादिषु विज्ञानम् ( मोक्षे धीर्ज्ञानमन्यत्र विज्ञानम् शिल्पशास्त्रयोः – अमरः) - but this is a general statement , not a hard and fast rule (अमरकोश deals with लौकिकशब्दs only not with वैदिकशब्दs ).

If one has to survey Indian tradition and explain the term it may consume a lot of time and effort. I shall take up a couple of examples and try to explain.
In Vedic literature the terms - ज्ञानम् - विज्ञानम्- प्रज्ञानम् etc are used to denote ब्रह्मन् ।
उपनिषत् --
सत्यं ज्ञानम् अनन्तं ब्रह्म (तै उ , ब्रह्मानन्दवल्ली)
सत्यम् - ज्ञानम् - अनन्तम् -- these three are विशेषणs of ब्रह्मन् , the विशेष्यम् ।
विशेषणम् , गुणः, उपाधिः - इति अनर्थान्तरम् ।
जैमिनि rules that there cannot be any connection among गुणs , because each one of them qualifies another and as such they are equal --
गुणानां च परार्थत्वात् असंबन्धः समत्वत् स्यात् (मी सू)
ज्ञानशब्दः भावल्युडन्तः ( ल्युट् - ' कृत्यल्युटो बहुलम् ' पा)
ज्ञानम् can be अन्तवत् ( having an end) - so the विशेषणम् - अनन्तम्
-- as a result the लौकिकज्ञानम् is अन्तवत् whereas this अलौकिकज्ञानम् is अनन्तम् ।
Another important point --
the usage - ज्ञानं ब्रह्म has got two purposes -
to avoid any कारक , such as कर्तृकारकम् , करणकारकम् etc.
to suggest that it does not have जडरूपता like मृत्तिका etc.

शांकरभाष्यम् --
सत्यादिशब्दा न परस्परं संबध्यन्ते परार्थत्वात् । विशेषणार्था हि ते । अत एव एकैकःविशेषणशब्दः परस्परं निरपेक्षः ब्रह्मशब्देन संबध्यते सत्यं ब्रह्म ज्ञानं ब्रह्म अनन्तं ब्रह्मेति ।

**.....** ज्ञानं  ज्ञप्तिः अवबोधः। भावसाधनः ज्ञानशब्दः न तु ज्ञानकर्तृ ब्रह्मविशेषणत्वात् सत्यानन्ताभ्यां      सह ।
**....** ज्ञानं ब्रह्मेति कर्तृत्वादिकारकनिवृत्यर्थं मृदादिवत् अचिद्रूपतानिवृत्यर्थं च प्रयुज्यते ।
शंकराचार्य **rakes up another point –**
**since** ब्रह्मन् **is** अप्रसिद्ध **(not popularly known - esoteric )**
**there will be** शून्यार्थता **like**
शाशशृङ्गम् **? No ,** सत्यं **,** ज्ञानम् **and** अनन्तम् **are both** विशेषण**s and** लक्षण**s ---**
सत्यादीनाम् अनृतादिधर्मनिवृत्तिपरत्वात् विशेष्यस्य ब्रह्मणः उत्पलादिवत् अप्रसिद्धत्वात्
मृगतृष्णांभसि स्नातः शशशृङ्गधनुर्धरः ।
एष वन्ध्यासुतो याति खपुष्पकृतशेखरः॥
इतिवत् शून्यार्थतैव  प्राप्ता सत्यादिवाक्यस्य इति चेत् ? न , लक्षणार्थत्वात् ।
(... यस्मात् लक्षणार्थप्रधानानि विशेषणानि न विशेषणप्रधानान्येव ।
....समानजातीयेभ्य एव निवर्तकानि विशेषणानि विशेष्यस्य ।
लक्षणं तु सर्वत एव यथावकाशप्रदात्राकाशमिति )
विशेषणत्वे’पिसत्यादिशब्दानां लक्षणार्थप्राधान्यम् इति अवोचाम। शून्ये हि लक्ष्ये अनर्थकं लक्षणवचनं , लक्षणार्थत्वात् मन्यामहे न शून्यार्थता इति ।
( उत्पलादिवत् अप्रसिद्धत्वात् -- वैधर्म्येण दृष्टान्तः - यथा उत्पलादि प्रसिद्धं तथा ब्रह्म न प्रसिद्धम् -- Korada)
शंकराचार्य further clarifies the meaning of  ज्ञानं ब्रह्म --
this does not mean --- ' ज्ञानम् means ब्रह्म ’ - but ’ ज्ञानम्  is a sign of ब्रह्मन् ’ - there is no वाच्यवाचकभाव but सामानाधिकरण्यम् -ओमित्येकाक्षरं ब्रह्म ।
(depending on विवक्षा , in some cases there can be तादात्म्यम् or वाच्यवाचकभाव -- ’तस्य वाचकः प्रणवः ’ - योगसूत्रम् ।

ओमित्येकाक्षरं ब्रह्म , वृद्धिःआदैच् , अमरा निर्जरा देवाः -
तादात्म्यम् - ’ भेदसहिष्णुः अभेदोपचारः) ।
-- अत एव च न ज्ञानकर्तृ ,तस्मादेव च न ज्ञानशब्दवाच्यमपि तद्ब्रह्म
। तथापि तदाभासवाचकेन बुद्धिधर्मविषयेण ज्ञानशब्देन तल्लक्ष्यते
न तु उच्यते ।
योगानुशासनम् **( 3-17)** --
शब्दार्थप्रत्ययानाम् इतरेतराध्यासात् सङ्करः तत्प्रविभागसंयमात्
सर्वभूतरुतज्ञानम् ।
How can a संयमी ( the trinity of धारणा , ध्यान and समाधि is called संयमः त्रयमेकत्र संयमः – योगसू.) can understand the languages of birds and animals - is the question . This सूत्रम् is in response to this question --
there are three things - शब्दः अर्थः and ज्ञानम् (प्रत्ययः) - due to super-imposition - such as --
शब्द एव अर्थः - अर्थ एव ज्ञानम् - ज्ञानमेव शब्दः --- गौरिति शब्दः -
गौरित्यर्थः - गौरिति ज्ञानम्
- they are united as an amalgam ( नीरक्षीरवत् सङ्करः - difficult to separate)
if a संयमी can separate the above three then he will be in a position to understand the languages of birds and animals .
व्याकरणम् --
This system is built depending on बौद्धार्थ -- ' अर्थवत् अधातुः
अप्रत्ययः प्रातिपदिकम् ’ पा ।
Patanjali , in पस्पशाह्निकम्, explains the meaning of शब्दशब्द as -
येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स
शब्दः ।
So संप्रत्ययः (ज्ञानम्) of an अर्थ is to be attained thru शब्द ।

By बौद्धार्थ , words such as शशशृङ्गम् , वन्ध्यापुत्रः etc are also covered - i e although there is no a thing that is tangible it can be taken as a प्रातिपदिकम् ।
योगिन्s call the same as विकल्पात्मकज्ञानम् ( यो सू 1-9) --
शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ।
शब्दं ज्ञानं च अनुपततीति शब्दज्ञानानुपाती - अर्थरहित इत्यर्थः ।
अर्थ is of two types - वस्तु (real) and बौद्धार्थ (imaginary).
श्रीहर्ष in his खण्डनखण्डखाद्यम् (खण्डखाद्यम् is an Ayurvedic tonic) quotes the famous line from Kumarila's श्लोकवार्तिकम् --
अत्यन्तासत्यपि ज्ञानम् अर्थे शब्दः करोति च।

**Means of *receiving* it, (~ways of knowing it )as per our Indian tradition**

There are प्रमाणानि - प्रत्यक्षम् ,अनुमानम् , उपमानम् , शाब्दम् ।
The number of Pramanas differs from system to system .

*************************************************

## ईश्वरः -----

These issues of सृष्टि etc are discussed in उपनिषत्s and seminal works of वेदान्त , such as शाङ्करभाष्यम् **(प्रस्थानत्रयम्) ,** वेदान्तपञ्चदशी **,** सुरेश्वराचार्यवार्तिकम् etc.
There is one thing called ब्रह्मन् / परब्रह्मन् and it is निर्गुण , निराकार etc.
It has got a शक्ति called माया , which is required to see that the beings face their कर्म (पुण्यम् / पापम्) ।
इन्द्रो मायाभिः पुरुरूप ईयते ( इन्द्रः = ब्रह्मन्) --बृ **2-5-19**
मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम् --श्वे **4-10**
दैवी ह्येषा गुणमयी मम माया --गी **7-14**

The ब्रह्मन् wished to exhibit itself in so many forms -
तदैक्षत बहु स्यां प्रजायेयेति - छां **6-2-1**
... तानि च तेजो’बन्नानां सृष्टिम् उक्त्वा तदेव प्रकृतं सदीक्षितृ ,तानि चतेजो’बन्नानि देवताशब्देन परामृश्याह - ’ सेयं देवतैक्षत , हन्त अहम् इमाःतिस्रः देवता अनेन जीवेन आत्मना अनुप्रविश्य नामरूपे व्याकरवाणि ’ (छां 6-3-2) --- ब्रह्मसूत्रशांकरभाष्यम् **-**
ईक्षत्यधिकरणम् **- 1-1-6**
The निर्गुणब्रह्मन् became जगत्कारणम् due to the उपाधि / adjunct called माया ।
In other words ईश्वर / ब्रह्मन् is managing the transactions of the universe .
This is difficult to digest without गुरूपदेश । In पुराणs the same concept is explained through stories.
When ब्रह्मन् is the cause of सृष्टि , associated with the उपाधि called माया , then it is सगुण ।
मनुष्यत्वादारभ्य ब्रह्मादिषु देहवत्सु सुखतारतम्यम् अनुश्रूयते ।
ततश्च तद्धेतोः धर्मस्य तारतम्यं गम्यते ।
---ब्र सू शां भा समन्वयाधिकरणम् **1-1-4**
ब्रह्माद्याः स्तम्बपर्यन्ताः प्राणिनो’त्र जडा अपि ।
उत्तमाधमभावेन वर्तन्ते पटचित्रवत् ॥ वेदान्तपञ्चदशी
**-चित्रदीपप्रकरणम् - 5**
In देवताधिकरणम् of ब्र सू शां भा , it is proposed that even देवताs are eligible for मोक्ष ।
Just like in the earlier कल्प ,धाता created सूर्य ,चन्द्रमाः ,आग्नि etc.
कृष्ण , शिव etc are on the top as they have the qualifications of अष्टैश्वर्य / भगवान् -
ज्योतिरादिविषया अपि आदित्यादयः देवतावचनाः शब्दाः चेतनावन्तम् ऐश्वर्याद्युपेतं तं तं देवात्मानं

समर्पयन्ति , मन्त्रार्थवादादिषु तथा व्यवहारात् । अस्ति हि ऐश्वर्ययोगात् देवतानां ज्योतिराद्यात्मभिः अवस्थातुं , यथेष्टं तं तं विग्रहं ग्रहीतुं सामर्थ्यम् । ---- ब्र सू शां भा **1-3-33**

So since they have the capacity to take any form due to ऐश्वर्य ( अष्टैश्वर्याणि)।

In other words the so called देवताः are superior - then come ऋषिs - then मनुष्याः and so on and so forth.

If there is सत्त्वगुण in plenty then the जीव is called देवता , रजोगुण then मनुष्य , तमोगुण then पशुपक्ष्यादि ।

By serving देवता ( or योगाभ्यास) one would get चित्तशुद्धि that leads to मोक्ष ( चित्तशुद्धि helps in attaining ज्ञानम् , which in turn leads to मोक्ष – ज्ञानादेव तु कैवल्यम् । Nowhere it is stated that चित्तशुद्धि gives मोक्ष ) ।

The subject is profound and tough and as such it requires a गुरु / आचार्य ।

Translations may not suffice to satisfy .

*******************************************************

## प्रामाण्यम् ---

The following may be useful to counter the ' scholar ' --

1. He is called a 'scholar ' - according to Indian Tradition if one has studied पदवाक्यप्रमाणशास्त्राणि ( व्याकरणम् , मीमांसा and न्यायवैशेषिके ) then only he is considered a विद्वान् / पण्डित and he will be eligible do discuss big and small issues . The one who is doing Research is also called a Scholar !

2. The first point is-are the quotations really authoritative ? Patanjali (in पस्पशाह्निकम्, महाभाष्यम् ) cautions about the authority of any given text -

